Entered
1.7.18
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1299.

तत्त्वचिन्तामणि-दीधिति-विवृति

PROVINCIAL MUSEUM
REFERENCE LIBRARY



5746

TATTVACINTĀMANI DIDHITI-VIVRITI

BY
GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY
MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA,
Late Professor, Sanskrit College.

VOLUME I FASCICULUS IV.

Calcutta.

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Chawdhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1911.

LIST OF BOOKS FOR SALE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	
*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6–14 @ /10/ each	5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana.	2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā. Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	1	4
Atmatattaviveka, Fasc. I. @ /10/ each	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7 ; Vol. II. Fasc. 1-7 @ 1/ each	15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-3 @ /10/ each ...	3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	2
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Baudhyostatrasangraha	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--14 @ /10/ each	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I, Fasc. 1-18, Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. 4, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	12
Ditto Çāṅkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each	10	0
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc 1--2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol I @ /10/ each	3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
*Kūrma Purāṇa, Fasc 3-9 @ /10/ each	4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, fasc. 1 @ 1/4	1	4
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नन्वेवं संयोगादिमति संयोगादेरप्यभावो मा सैतसीत् मूले न कपिसंयोग इत्यादिप्रतीतिरपि मूलनिष्ठसंयोगावच्छेदकत्वाभावावलम्बनतयोपपत्तिरित्यत आह, 'बाधकाभावादिति, तत्र कपिसंयोगाभावो वृत्त्यावृत्तिरित्यादिप्रत्ययस्यानुभवादिति भावः। संयोगाभावे वृत्त्यावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वप्रत्ययेऽपि विवादसम्भवात् यत्र सामानाधिकरण्याभावस्य प्रत्यक्षासम्भवस्तत्र तत्सत्त्वे मानाभावेन तदनधिकरणत्वं निष्प्रत्यूहमित्यतिव्याप्तिरित्यत आह, 'अतीन्द्रियसाध्यक इति, इदं गुरु द्रव्यत्वात् पृथिवी गुरुत्वादित्यादावित्यर्थः (१)। 'तत्रेति गुरुत्वादिसाध्यकस्थले सामानाधिकरण्याभावस्यातीन्द्रियप्रतियोगिकत्वेनातीन्द्रियतया अतीन्द्रियहेतुकस्थले च धर्म्मिण एव तथात्वेन हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः। 'तदभाववद्वृत्तित्वेन' गुरुत्वाभाववद्वृत्तित्वेन, 'तत्र' द्रव्यत्वादौ, 'तत्' गुरुत्वादिमद्वृत्तित्वाभाववत्त्वम्, 'अनुमेयमिति तद्विरुद्धदृष्टान्तेनेत्यादिः, 'तदिति गुरुत्वादिमदित्यर्थः, 'उपाधित्वादिति, तद्वृत्तिभिन्नत्वस्य विरुद्धदृष्टान्ते साध्यव्यापकतायाः पक्षीभूते प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनव्यापकतायाः सुग्रहत्वात्, पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ साध्यव्यापकतानिश्चयासम्भवेऽपि सन्दिग्धोपाधित्वस्य दुर्व्वारत्वात् अनुकूलतर्कविरहेण सन्दिग्धोपाधेरपि दूषकत्वादिति भावः। नन्वेवमतीन्द्रियसंयोगादेरप्यव्याप्यवृत्तित्वं न स्यात् तद्वति तदभावस्य

(१) इदं गुरु द्रव्यत्वात् आकाशाभावादित्यादावित्यर्थः इति पा०।

State Museum Library Lucknow 5146

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यक्षासम्भवेनासिद्धेरनुमानस्याप्रयोजकत्वात्, एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामतमाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे 'कर्म्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः' इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्धृता तथाच तन्मते युक्तिर्भवतु मा वा उभयथापि तदाश्रित्य पूर्व्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्क्य दूषणान्तरमाह, 'इदमिदानीमिति कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः, अभावादेरिहेतिप्रत्ययनियामको यो दैशिकविशेषणताविशेषस्ततस्तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम्। न चेदानीमिति प्रतीतौ सम्बन्धवैलक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहनादिहेतिप्रत्ययात् तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यं। सम्बन्धविशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात् इदानीं कालत्वाभावइत्यादिप्रतीत्या काले कालत्वाद्यभाववृत्तेः प्रामाणिकत्वेऽपि काले कालत्वं नास्तीति प्रतीत्यनुदयात् नास्तीत्याकारप्रतीतौ कालिकसम्बन्धव्यावृत्तरूपावच्छिन्नाया एव विशेषणताया नियामकत्वस्यावश्यकत्वात् दैशिक कालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धसम्बन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च। 'सद्धेताविति कालत्वादिसाध्यकघटादिहेतावित्यर्थः, 'काल इति कालावच्छेदेनेत्यर्थः, 'अप्रसिद्धेरिति, वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अवृत्तिनिष्ठतदभावस्य च कालानवच्छिन्नत्वात् अवच्छेद्याधिकरण-सम्बन्धिनोऽनवच्छेदकत्वात् ।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव काल-वृत्तित्वाभावः प्रसिद्धइति महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वस्यासत्त्वात् स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावावच्छेदकत्वसम्भवाच्च । न च तादात्म्यसम्बन्धो नाव-च्छेदकतानियामकः रूपे पर्व्वते न वह्निमत्संयुक्तत्वमिति प्रती-तिवत् स्वस्मिन् न वह्निमत्संयुक्तत्वमित्यादिप्रतीतेः सविवादत्वा-दिति वाच्यम् । तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्बद्धे हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छे-देन साध्यासामानाधिकरण्यवत्त्वविरहेणातिव्याप्तेः स्फुटतया तद्दो-षोपेक्षाया अनुचितत्वापातात् ।

अत्र केचित् कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमिति-मताभिप्रायकोऽयं ग्रन्थः, तथाच कालावच्छेदेन महाकालेऽपि कालिकसम्बन्धेन साध्यवद्वृत्तित्वसत्त्वात्तद्विरहिणोऽप्रसिद्धिर्न विरु-ध्यत इति वदन्ति ।

वस्तुतस्तु स्वस्मिन् सामानाधिकरण्य-तदभावयोर्वृत्तावच्छेद-कत्वे स्वाधिकरणत्वमेव नियामकं न तु स्वसम्बन्धित्वमात्रं स्वाधि-करणावच्छेदेनैव स्वस्मिन् तत्प्रतीतेरनुभवसिद्धत्वात् अतएव सम्बन्धान्तरेण सम्बद्ध इत्युपेक्ष्य सम्बन्धारेण वर्त्तमान इत्यभिहि-तम् । न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन व्यभिचारिण्य-तिव्याप्त्यकथनान्न्यूनता दुर्व्वारैवेति वाच्यम् । तादृशसम्बन्धेन साध्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वद्वृत्तित्वस्य हेत्वधिकरणत्वस्य चाप्रसिद्धा अतिव्याप्त्यसम्भवात्। न च तेन सम्बन्धेन सद्धेतौ लक्षणसङ्गमनाय वृत्तेरधिकरणतायाश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वादतिव्याप्तेरावश्यकतेति वाच्यम्। प्राचां तेन सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भव इत्यभिप्रायेणैवातिव्याप्त्यनुद्भावनात्। एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्बन्धेन तद्वृत्तौ तद्विषयकज्ञान एव साध्यासामानाधिकरण्यप्रसिद्धिः सम्भवति। न चैवमपि कालत्ववान् सर्व्वस्मादित्यादौ खण्डकालस्य हेत्वधिकरणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धिर्दुर्व्वारैवेति वाच्यम्। हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतापर्य्यन्तानिवेशे वैशिष्ट्य-व्यासज्यवृत्तिधर्म्मावच्छिन्नस्य यत्र हेतुत्वमभिहितं तत्र तत्र तादृशधर्म्मस्यैव तन्मते स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्यानुमततया उक्तस्थले सर्व्वत्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेनावृत्तौ कालिकसम्बन्धेन कालवृत्तौ गगनत्वादाविव तादृशसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरित्यपि निरस्तम्। तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेऽपि तादृशसम्बन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहेण च तस्य तज्ज्ञानानधिकरणत्वात्तज्ज्ञाने अभाववृत्तौ तत्कालस्यानवच्छेदकत्वात् महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्रायको वाऽयं ग्रन्थः तादृशसम्बन्धेन हेतुमत्तायाः खण्डकालेऽभावान्नोक्तदिशा प्रसिद्धिरित्यपि कश्चित्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्र स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकताद्दशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वविवक्षणान्नोक्ताव्याप्त्यवकाशः स्वावयवपरमाण्वाद्यवच्छेदेन घटादौ वर्त्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणगमनसम्भवात् केवलान्वयिसाध्यके मेयत्वादौ सर्व्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वस्य सत्त्वात् स्वनिष्ठतदभावाप्रसिद्ध्याऽव्याप्तिर्न क्षतिमावहति मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात् । यदि चैवमात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वात् आत्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात्तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववद्वृत्त्यसम्भवाद्धेतुनिष्ठताद्दशाभावाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्त्तते योऽभावस्तत्प्रतियोगितानवच्छेदकताद्दशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्षणीयं कालत्ववान् घटादित्यादौ कालावच्छेदेन घटादौ वर्त्तमानः कपालसमवेतत्वाद्यभावएव प्रसिद्धः तत्प्रतियोगितानच्छेदकञ्च कालिकसम्बन्धावच्छिन्नकालवृत्तित्वादिकमिति लक्षणसमन्वयः, हेतुतावच्छेदकसम्बन्धेन यद्वृत्तिमत् तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यतद्वृत्तित्वाभावानच्छेदकतत्सम्बन्धावच्छिन्नतद्वस्तु-प्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम् आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ आत्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यानात्मवृत्तित्वाभावस्यानव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छेदकं घटत्वाभाव-ज्ञानवह्निन्नत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वयः। उभयाधिकरणत्वनिवेशाद्वह्निमान् धूमादित्यादौ धूमादिसंयोगिनः कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न क्षतिः कपालादेः संयोगेन तद्घटानधिकरणतया उक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात्। अथवा हेतुतावच्छेदकसम्बन्धेन यत् स्वाधिकरणं तदवच्छिन्नस्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्षणान्न कश्चिद्दोषः सर्व्वत्र सद्धेतौ अन्ततोऽवृत्तौ प्रसिद्धे साध्यसामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात्। वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावे अयोगोलकादेरिव तद्वृत्तित्वस्याप्यवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः (१)॥

इति महामहोपाध्याय-श्रीगदाधर-भट्टाचार्य्य-विरचितायां
अनुमानदीधितिविवृतौ सिंहव्याघ्रनामक-
व्याप्तिद्वयं सम्पूर्णमिति।

---

(१) 'परिष्कारस्य पन्थानो द्रष्टव्याः' इत्यनन्तरं 'अथवा साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये यदधिकरणावच्छिन्नत्व-यद्वृत्तित्वोभयाभावस्तत्त्वं यद्वा यदधिकरणावच्छिन्नयद्वृत्तिसामान्ये साध्यवद्वृत्त्यभावान्यत्वं साध्यवद्वृत्त्यभावे वा यदधिकरणावच्छिन्नयद्वृत्त्यन्यत्वं तत्त्वम्'। इत्यधिकः पाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तत इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणौ

व्यधिकरणधर्म्मावच्छिन्नाभावः ।

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घटएव प्रसिद्धः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् । न चैवं घटएव व्यभिचारः, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः, नच वाच्यत्वाभावस्तादृशो घट इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावोव्याप्तिः । तथाचाप्रसिद्धिः ।

तत्त्वचिन्तामणिदीधितिः ।

'समवायितयेति, वाच्यत्वं न यथा समवायि तथा वच्यते, घटादिसमवायितयेत्यर्थः इत्यप्याहुः, प्रमेयसाध्यके च भावत्वेनाभावानां अभावत्वेन भावानां वह्नित्वेन निर्व्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्व-पटत्वाभ्याञ्च सर्व्वत्र प्रमेयमात्रस्याभावः सुलभः

गादाधरी विवृतिः ।

'अथ समवायितयेति मूलम्, अथ व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे सर्व्वत्र तादृशाभाववति हेतोर्वृत्तेरसम्भवः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्व्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सोन्दडमतावलम्बनेन मूललक्षणपरिष्कर्त्तुरीदृशाशङ्का न गच्छते इति चेदत्रोपाध्यायमतानुयायिनः केवलान्वयिनि साध्याभावाप्रसिद्धि-निबन्धनदोषस्य उद्भावितत्वात् साध्याभावस्य कथञ्चित् प्रसिद्धाविव लक्षणस्य निर्द्दोषतेत्यभिमानिनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यतीत्यग्रे 'तर्हीत्यादिग्रन्थेन । व्यधिकरणधर्म्मावच्छिन्ना-भावोपगमे यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्या-भावो निवेश्यते तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभावएव निवे-शनीयः अन्यथा असम्भवस्यातिव्याप्तेर्वा प्रसक्तिः व्याप्तेरव्यभिचार-रूपतानुपपत्तिश्चेति (१) पुनरप्रसिद्धिनिबन्धनाव्याप्तिः । केवलान्व-यिसाध्यकस्थल इति तदर्थः । न चैवमपि तत्तद्वह्नित्वापच्छि-न्नाभावव्यावर्त्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेणैव साध्याभावस्य विशेषणीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले सम-वायित्वावच्छिन्नतदभावस्यातादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगि-नीति कथमियमाशङ्का साध्यप्रतियोगिकाभावमात्रनिवेशाभिमान-स्याप्याशङ्कावीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छि-न्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृशाभावस्य प्रसि-द्धिसम्भवेन सोन्दडमतावलम्बनस्य निर्व्वीजत्वापातादिति वाच्यम् ।

---

(२) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभावमादायासम्भवा-सम्भवादाह, अतिव्याप्तेर्वेति, यदि वा पारिभाषिकमेव लक्षणं क्रियते तदाप्याह, व्याप्तेरिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महानसीयवह्नित्वावच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्य्याप्त-स्वसमानाधिकरणनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगि--ताकाभाव एव निवेशनीय इत्यभिप्रायेणाशङ्कासङ्गतेः। प्रमेयत्वादि-ना प्रमेयमात्रं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेया-पर्य्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमा-नाधिकरणवृत्तिताहशावच्छेदकतानिरूपकप्रतियोगिताभिन्नञ्च व्य-धिकरणधर्म्मावच्छिन्नप्रतियोगितामात्रमेव। यत्र यादृशं साध्यताव-च्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्व-समानाधिकरण-धर्म्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावनिवेशाभिप्रायको--ऽयं ग्रन्थ इत्यप्याहुः। न चैवं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्यैव लक्षणघटकतासम्भवाद्दीधितिकृतां तत्र गगनत्व-घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्या-भावपर्य्यन्तानुसरणप्रयासोऽव्यर्थः इति वाच्यम्। महानसीयवह्नि-त्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगि-ताकः साध्यतावच्छेदकापर्य्याप्तसाध्यवृत्तिधर्म्मनिष्ठावच्छेदकता-कान्यप्रतियोगिताको वाऽभावो निवेशनीय इत्यभिप्रायेण तैस्तथा-विधाभावानुसरणात्। न च घटत्व-पटत्वोभयावच्छिन्नप्रतियोगि-ताकाभावप्रतियोगितावच्छेदकत्वं साध्यवृत्तिधर्म्मनिष्ठमेव घटत्व-पटत्वयोः प्रत्येकं साध्यवृत्तित्वादिति कथमसौ लक्षणघटक इति वाच्यम्। साध्यवृत्तिधर्म्मनिष्ठेत्यनेन यत्पर्य्याप्त्यधिकरणधर्म्मविशिष्टा-धिकरणं साध्यं तस्य विवक्षिततया घटत्व-पटत्वोभयपर्य्याप्ताव-च्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात्। वस्तुतस्तु वृत्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मद्वृत्तयोयावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव साध्याभाववदवृत्तित्वमित्यस्यार्थः, इत्यभिप्रायकतया 'अथेत्यादिग्रन्थः सार्व्वभौमैर्व्याख्यातः, दीधितिकृतामपि तादृशग्रन्थस्य तदभिप्रायकत्वमेवानुमतं कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेऽपि आपाततः सम्भवदुक्तिकतयैव तत्शङ्कितुरभिप्रायविषयत्वौचित्यात्। व्यधिकरणधर्म्मावच्छिन्नाभाववादिमतेऽपि (१) निर्द्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य 'प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारणमनुचितमित्यभिप्रेत्यैव अग्रे तल्लक्षणमाक्षिप्यमिति न सन्दर्भविरोधः। 'यत्समानाधिकरणा इत्यादिलक्षणाभिप्रायकता चात्र न युज्यते तादृशव्याप्तेः साध्याभाववदवृत्तित्वादिरूपत्वाप्रसक्तेः मूलोक्तलक्षणपरिष्कारासम्भवात् व्यभिचारशरीरे साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशस्यावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेन अव्यभिचारपदार्थरूपसाध्याभाववद्वृत्तित्वा-

---

(१) व्यधिकरणधर्म्मावच्छिन्नाभावत्वं "विवादोऽप्यतिरिक्तायामेव प्रतियोगितायाम्" इत्यादिग्रन्थस्वरसेन अतिरिक्तप्रतियोगिताकाभावत्वम्, अथवा प्रतियोगिताविशिष्टप्रतियोगिताकाभावत्वं व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावत्वं वैशिष्ट्यं स्वतादात्म्य-स्वाश्रयनिष्ठाधेयतावच्छेदकताविशिष्टान्यावच्छेदकताकत्वोभयसम्बन्धेन, सम्बन्धघटकवैशिष्ट्यं स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन, स्ववृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनातो विशिष्टसत्त्वेन गुणो नास्तीतिप्रतीतिसिद्धाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावत्वव्याघात इति विवेचनीयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावस्य व्याप्तित्वे निराकृते च साध्याभाववद्वृत्तित्वाभावस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन 'यत्समानाधिकरणा इत्यादिनिर्द्दोषलक्षणमवलम्ब्यैव स्वयं प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थस्यावतारणीयत्वात् । न च साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवद्वृत्तित्वस्यापि व्यभिचारपदार्थत्वसम्भवात्, कूटघटितव्याप्तेरव्यभिचारत्वमुपपद्यत इति वाच्यम् । तादृशाभावकूटसामानाधिकरण्यस्य व्यभिचारपदार्थत्वे 'न चैवं घट एवेत्यादिना दर्शिताया ज्ञेयत्वादिहेतौ वाच्यत्वव्यभिचारित्वव्यवहारापत्तेर्दुर्व्वारत्वात् वाच्यत्वादेः समानाधिकरणधर्म्मावच्छिन्नाभावाप्रसिद्धेर्व्यधिकरणधर्म्मावच्छिन्नाभावकूटवति च हेतोर्वृत्तेरिति सर्व्वमनाकुलम् । एवञ्च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुसरणं ग्रन्थकृतां सफलं घटत्वाद्यवच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादित्यवधेयम् (१) ।

ननु वाच्यत्वं पदशक्तिः सा च तत्तत्पदबोद्धव्यत्वप्रकारिका भगवदिच्छैव (२) न तु पदार्थान्तरम् अपसिद्धान्तत्वात्(३) तथाच समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्म्माव-

---

(१) अथ समवायितयेति मूलमित्यादिः इत्यवधेयमित्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति ।

(२) अस्माच्छब्दादयमर्थोबोद्धव्य इत्याकारकभगवत्सङ्केतस्य पदशक्तिरूपत्वमिति भावः ।

(३) सिद्धान्तविरुद्धत्वादित्यर्थः, अवश्यक्लृप्तपदार्थेनैव चरितार्थत्वे अतिरिक्तपदार्थस्वीकारो न सङ्गच्छत इति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छिन्नप्रतियोगिताकत्वम्। न च भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेर्घटादिपदवाच्यत्वापत्तिर्घटादाविव पटादावपि घटादिपद-बोध्यत्वप्रकारिकाया भगवदिच्छाया विषयतासम्बन्धेन सत्त्वात् तदिच्छाया एकत्वादिति वाच्यम्। यद्धर्म्मांशे यस्य प्रकारता तस्यैव धर्म्मिणो विशेष्यतासम्बन्धेन तद्धर्म्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेर्घटादिपदबोध्यतया भगवदिच्छया अनवगाहनात् तत्र विशेष्यतासम्बन्धेन तद्बोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः। न चैवं विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेष-णांशे समवायित्वाभावात्तेन रूपेण विशिष्टाभावस्य व्यधिकरण-धर्म्मावच्छिन्नप्रतियोगिताकत्वमव्याहतमेवेति वाच्यम्। यतो विशि-ष्टाभावप्रतियोगिता न विशेषणान्तर्भावेन पर्य्याप्ता अपि तु विशेष्यां-शमात्रे, अवच्छिद्यते पुनरियं विशेषणेन, प्रतियोगिताया अव्यास-ज्यवृत्तित्वात् (१) तथाच विशेष्यवृत्तेः समवायित्वस्य कथं प्रतियोगि-ताव्यधिकरणत्वमिति। न च प्रतियोगिताया व्यासज्यवृत्तित्वानुप-गमे सर्व्वत्र घटत्वेन घट-पटोभयं नास्तीतिप्रतीतिः कथमुपपद्यतां घटादिमति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेन तद्विष-याभावस्य सत्त्वासम्भवात् इति अभावविशेषीयप्रतियोगित्वमवश्य-मेव व्यासज्यवृत्त्युपेयं तथा सति च तत्र प्रतियोगितापर्य्याप्त्यधि-करणस्योभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्ट-त्वासम्भवाद्यद्धर्म्मावच्छिन्ने प्रतियोगितायाः पर्य्याप्तिः प्रतियोगिता-वच्छेदकविशिष्टस्य तदवच्छिन्नस्यैवाभावविरोधितया न तादृशा-

(१) व्यासज्यवृत्तित्वञ्च एकत्वानवच्छिन्नपर्य्याप्तिकत्वम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावस्य सार्व्वत्रिकत्वानुपपत्तिरिति वाच्यम्। प्रतियोगिताया-अव्यासज्यवृत्तित्वेऽपि तत्रैकधर्म्मावच्छिन्नापर्य्याप्तिरूपविरोधशालिनोर्घटत्व-पटघटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात्तादृशाभावस्य विरुद्धघटत्व-पटत्वाद्युभयावच्छिन्नाभाववत् केवलान्वयित्वोपपत्तेः। यद्यपि घट-पटौ नस्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेन पर्य्याप्तं तथापि तत्र द्वित्वधर्म्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकत्वं प्रतीयते अत्र च स्वातन्त्र्येणापीति भेदः। अस्तां वा तत्रोभयाभावप्रतियोगिताया गत्यन्तरविरहादव्यासज्यवृत्तित्वं तथापि विशिष्टाभावप्रतियोगितायास्तथात्वमप्रामाणिकमेव दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेः इत्यत आह, दीधितौ 'वाच्यत्वं न यथेति, 'तथा वच्यत इति, अयमाशयः वाच्यत्वं शक्तिविषयत्वं न तु शक्तिः धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापत्तेः विषयत्वञ्च पदार्थान्तरम् इति प्राचीननैयायिकैकदेशिसिद्धान्तः तस्य च न समवायः सम्बन्धः अपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्म्मावच्छिन्नाभाव एवेति एकदेशिमतानुयायितया मणिकारलिखनसङ्गतिरिति। 'घटादिसमवायितयेति, तथाच वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि नासङ्गतिरिति भावः। यथाश्रुतपरतयैवोपपत्तेः समवायिपदस्य विशेषपरतया व्याख्यानमनुचितमित्याहुरित्यनेनास्वरसः सुचितः।

ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्म्मा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छिन्नसाध्याभावप्रसिद्धिसम्भवेऽपि प्रमेयत्वादिना प्रमेयसामान्य-साध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्व्वारैवेति प्रमेयसामान्यावृत्ति-धर्म्मस्याप्रसिद्धया व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यापि तस्यासम्भवात् इत्यत आह, 'प्रमेयसाध्यके चेति (१) 'भावत्वेनेति, 'अभावानां भावनामित्युभयत्रैव 'अभाव इत्यग्रिमस्य सम्बन्धः, अभावत्व-भावत्वाभ्यां भावाभावयोरभावौ समनियततया अभिन्ना-विति तत्प्रतियोगितात्वेन प्रमेयत्वसमनैयत्यमित्येतादृशाभावोऽपि कूटघटनया परिष्करणीयसाध्याभाववदवृत्तित्वरूपप्रथमलक्षण-घटको भविष्यतीत्यभिप्रायः। न च यदभावीयप्रतियोगिता-त्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके च तादृशाभावाप्रसिद्धिः निखिलव्यधिकरण-धर्म्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि तथा-विधवाच्यत्वाभावप्रतियोगित्वात् किञ्चिद्विशिष्टस्वाभावादेरपि (२) वह्न्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्य-मिति विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकतेति वाच्यम्। समनैयत्यशरीरे व्यापकतायास्तदभावप्रतियोगितात्वावच्छिन्नाया-व्याप्यतायाश्च विशेषरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात्। ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकता चेत् समनैयत्यशरीरे निवेश्यते तदा व्यधिकरणधर्म्मावच्छिन्नयो-र्भावाभाववृत्तिप्रतियोगितयोर्द्वयोरेव प्रत्येकं प्रमेयनिष्ठान्योन्याभाव-

(१) प्रमेयसामान्यसाध्यके चेति पा०।

(२) समनियताभावानामैक्यानभ्युपगमेऽपि दोषमाह, किञ्चिदित्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगितावच्छेदकतया नोक्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वम् इत्यतोऽभावान्तरमाह, 'वह्नित्वेनेति 'प्रमेयमात्रस्याभाव इत्यग्रिमेनान्वयः, वह्नित्वेन प्रमेयं नास्तीति-प्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात् प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भावः। यदि च तत्र वह्निर्नास्तीतिप्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे वह्निर्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगितायाः वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्म्मावच्छिन्नवह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना वह्न्याद्यभावमादाय वह्निमान् प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेरित्युच्यते, तदा तादृशाभावस्यापि नोक्तरूपत्वमित्याशङ्क्य अभावान्तरमुपन्यस्यति,(१) 'अवृत्तिमात्रेति, गगनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयते अवच्छेदकैक्येऽसति बाधके प्रतियोगिताया अप्यैक्यस्वीकारात् गगनभिन्ननिष्ठप्रतियोगिताया-गगनावृत्तित्वेन (२) गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽवृत्तित्वेन गगनतया गगनभिन्नाभावस्य केवलान्वयितोपपत्तेः, वह्नित्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगितायाश्च वह्निनिष्ठ-

(१) अभावान्तरमाहेति पा०। (२) गगनवृत्तित्वेऽपीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृशप्रतियोगित्वाभेदे वह्न्यादिमति वह्नित्वादिना घटाभावसत्त्वानुपपत्त्या उक्तरीत्या तत्रैकप्रतियोगितापत्त्यसम्भवः एवञ्च गगनत्वाद्यवच्छिन्नैव प्रमेयत्वसमनियतप्रतियोगिता प्रसिद्ध्यतीति भावः। उक्तविशेषलाभायैवावृत्तिमात्रवृत्तित्वकथनम् (१)। नन्वेवमपि यत्र विषयितया प्रमेयसामान्यं साध्यम् ईश्वरज्ञानत्वादिकं हेतुस्तत्र सत्तावान्जातेरित्यादौ साध्याभावकूटवति हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिद्ध्याव्याप्तेर्व्वारणाय उपादेयसाधनसामानाधिकरण्यरूपविशेषणाक्रान्तसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावाप्रसिद्धिर्गगनादेरपि विषयितासम्बन्धेन ईश्वरज्ञानादिसम्बद्धत्वात् तादृशसम्बन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यासम्भवादित्यतोऽभावान्तरमाह, 'विरुद्धेति येन सम्बन्धेन घटत्व-पटत्वाद्योर्व्विरोधस्तत्सम्बन्धावच्छिन्नतदुभयनिष्ठप्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थः, प्रतियोगितावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्व–पटत्वाद्यवच्छिन्नप्रतियोगिनोऽप्रसिद्ध्या विरोधविरहेणास्याभावस्य केवलान्वयित्वमवधेयम्। इदमुपलक्षणं व्यधिकरणधर्म्मावच्छिन्नाभाववादिनां प्रतियोगितावच्छेदकतावच्छेदकरूपेणैव तादृशसम्बन्धेनाप्यवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात् समवायादिसम्बन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम्। अत्यन्ताभावस्येवान्योन्याभावस्यापि व्याधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वोपगमात् प्रमेयसामान्यस्य यत्र तादात्म्यसम्बन्धेन साध्यता

(१) अवृत्तिमात्रवृत्तित्वकीर्त्तनमिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र घटत्व-पटत्वाभ्यां समवायेन गगनादिना वा प्रमेयसामान्य-भेदो लक्षणघटकः प्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथेत्यवधेयम्।

तत्त्वचिन्तामणिदीधितिः।

ननु पारिभाषिकमेवाव्यभिचरितत्वं, तथाहि यत्-समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगि-समानाधिकरणास्तत्त्वं सर्व्वत्र वाच्यत्वाद्यभावस्य तथा-त्वाद्यावत्त्वोपादानम्। अतएव भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामा-नाधिकरण्येऽपि भूतत्व-मनोन्यत्वाद्यभावस्यातथात्वा-न्नातिप्रसङ्गः। गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य वा तथात्वात् साध्यतावच्छेदकेत्यादि।

गादाधरी विवृतिः।

ननु व्यधिकरणधर्म्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचारा-भावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य लक्षणघट-कतया अप्रसिद्धिनिबन्धनाव्याप्तेर्दुरुद्धरतयैव वादिनो निवृत्ते-र्व्यधिकरणधर्म्मावच्छिन्नभावखण्डनपरग्रन्थानुत्थितिरित्यतस्ताद्दृश-ग्रन्थमवतारयति, 'नन्वित्यादिना, 'पारिभाषिकमिति तान्त्रिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्कितरूपपरिभाषया व्याप्तिप्रतिपादकं न तु योगेनेत्यर्थः, 'अव्यभिचरितत्वम्' अव्यभिचरितत्वपदम्, अथवा 'पारिभाषिकमव्यभिचरितत्वं' परिभाषया अव्यभिचरितत्वपदप्रतिपाद्यं, व्याप्यत्वमिति शेषः, न तु योगेन तत्पदलभ्यमित्येवार्थः, तथाच व्यभिचारघटकसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न क्षतिरिति भावः। 'यदिति, 'यत्पदं यद्धर्म्मावच्छिन्नपरम्, अग्रे 'तत्-पदमपि तद्धर्म्मावच्छिन्नपरं, स च धर्म्मो हेतुतावच्छेदकीभूतधूमत्वादिः, सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणः साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताको घटत्वादिना वह्न्याद्यभावादिरेव तस्य च प्रतियोगिसामानाधिकरण्यमावश्यकमिति लक्षणसमन्वयः। व्यभिचारिणि व्यभिचारनिरूपकाधिकरणीभूतहेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणाक्रान्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकः साध्याभावादिरपि (१) तस्य च प्रतियोगिसामानाधिकरण्याभावात् तादृशाभावस्य च प्रतियोग्यधिकरणे कालिकादिसम्बन्धेन वृत्तावपि विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्य विरहान्नातिव्याप्तिः। अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकसाध्याभावादिमादायाव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमभावविशेषणम् अभावस्य वृत्तौ सम्बन्धभेदानिवेशेन वह्निमान्धूमादित्यादौ वह्नित्वादिना वह्न्याद्यभावस्य प्रतियोगिमति पर्व्व-

(१) आदिपदात् व्यभिचारस्थलान्यत्वाभावपरिग्रहः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसमन्वयसम्भवान्न तत्राव्याप्तिवारणं तत्फलमिति तु ध्येयम् । अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकावच्छिन्नत्वनिवेशः । यद्यप्ययमात्मा ज्ञानादित्यादौ समानाधिकरणधर्म्मावच्छिन्नाभावमादायाव्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य घटत्वादिना धूमाद्यभावस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणीयतया अयोगोलकाद्यन्तर्भावेन च तादृशाभावस्यातथात्वान्नातिप्रसङ्गः, स्वविशिष्टहेत्वधिकरणेत्यत्र यत्पदेनैव हेतोरुपादेयतया तत्त्वमित्यत्र तत्पदेन तस्यैव परामर्शाद्व्याप्तेर्हेतुनिष्ठतोपपत्तिरिति, तथापि कपिसंयोगाभाववान्जातित्वादित्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या सत्तावानात्मत्वादित्यादौ (१) सत्ताधिकरणे काले कालिकादिसम्बन्धेन वर्त्तमानस्य सत्ताभावस्य तदप्रसिद्ध्या (२) अव्याप्तिर्दुर्व्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तम् ।

---

(१) अभावे भावभिन्नत्वं निवेश्य तत्राव्याप्तिवारणं सम्भवतीत्यतः स्थलान्तरानुसरणम् । (२) स्वविशिष्टहेत्वधिकरणाप्रसिद्धेरित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्तु अयमात्मा ज्ञानादित्यादौ आत्मत्वत्वादिना आत्मत्वादिरभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिस्तस्यापि प्रतियोग्यधिकरणीभूते आत्मादावेकज्ञानविषयत्व-स्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धेन वर्त्तमानतया प्रतियोगिसमानाधिकरणत्वात् इति सामानाधिकरण्यान्तविशेषणमनर्थकम्, तन्न, एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात्। नचैवमपि यदभावो व्यभिचारविरोधीत्युपाधिलक्षणे इह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिव्यवहारानुरोधेन अव्याप्यत्वस्य सम्बन्धतया ग्रन्थकृतैव स्वीकृतत्वात् तेन सम्बन्धेनैवात्मादावात्मत्वाभावादेर्वृत्तेः प्रतियोगिसामानाधिकरण्यमक्षतमेवेति वाच्यम्। अव्याप्यत्वादेः सम्बन्धतायां विवादेन यदभावपदस्य यदव्याप्यत्वाद्यभावपरतामभ्युपगस्यापि ग्रन्थकृता तादृशलक्षणव्याख्यानात् तत्सम्बन्धतायाम् अप्रामाणिकत्वाभिप्रायेणैवात्र यत्समानाधिकरण इत्युपादानात्। यावत्पदासत्त्वे साध्यतावच्छेदकेत्यादिविशेषणस्य व्यावृत्तिर्न सङ्गच्छते यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवात् अतश्चरमोक्तस्यापि तत्पदस्य व्यावृत्तिं प्रथमतो दर्शयति, 'सर्व्वत्रेति, 'तथात्वात्' प्रतियोगिसमानाधिकरणत्वात्, तथाच यावत्पदानुपादाने व्यभिचारिमात्र एवातिव्याप्तिरिति भावः। यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्व्वत्र तादृशाभावस्य तथात्वकथनमयुक्तं, तथापि यावत्पदानुपादानेऽतिव्याप्तिरेव नाव्याप्तिरित्येतत्सूचनाय सर्व्वत्रेत्युक्तम्। अथवा 'सर्व्वत्र' सर्व्वाधिकरणावच्छेदेन, तथाच विवक्षणीयस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम्। ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयः तद्व्याप्यत्वञ्च स्वव्यापकतत्कत्वम् अतो नानवस्था, वह्निमान् धूमादित्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयप्रतियोगिसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्न्याद्यभावमादायैव लक्षणसमन्वयः (१) इत्थञ्च धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसम्भवस्तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात् एवं सति हेतुसमानाधिकरणत्वविशेषणमप्यनर्थकमिति (२) चेत्तदपि तर्हि त्यज्यतामित्याशङ्कापरिहाराय तथाविधाभावनिवेशनेऽपि (३) यत्रातिव्याप्तिस्तत्र तत्पदव्यावृत्तिमाह, 'अतएवेति, 'अतएव' यावत्पदोपादानादेव, 'द्वित्वाद्यवच्छिन्नाभावस्य' भूतत्व-मूर्त्तत्वोभयत्वाद्यवच्छिन्नाभावस्य, 'प्रतियोगिसामानाधिकरण्येऽपि' मनोगगनयोः प्रत्येकं भूतत्व-मूर्त्तत्वरूपप्रतियोगिसामानाधिकरण्येऽपि, तथाच यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकरणतया अति-

---

(१) लक्षणसङ्गतिरिति पा०।

(२) घटत्वादिना आत्मत्वाद्यभावमादाय अयमात्मा ज्ञानादित्यादौ लक्षणागमनसम्भवादिति भावः।

(३) साध्यतावच्छेदकव्याप्यप्रतियोगिताकाभावनिवेशनेऽपीत्यर्थः।

5146

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्तिः स्यादिति भावः। यावत्पदसत्त्वे यादृशाभावमादायातिव्याप्तिवारणं तादृशाभावं दर्शयति, 'भूतत्व-मनोन्यत्वाद्यभावस्येति भूतत्वाभावस्य मनोऽन्यत्वाभावस्य चेत्यर्थः, 'अतथात्वात्' प्रतियोग्यसमानाधिकरणत्वात्, यावत्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदभावान्तर्गतमहानसीयवह्न्याद्यभावमादायाव्याप्तिः स्यात् इति यथोक्तविशेषणस्यैव (१) उपादेयतया तादृशाभावयोरपि (२) लक्षणघटकत्वादिति भावः। भूतत्वस्य वहिरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानाञ्चालनीन्यायेन उत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेनाखण्डव्याप्यवृत्तिमनोभेदाभावानुधावनमिति। उक्तरीत्या 'अतएवेत्यादिग्रन्थावतारात् प्रथमतो वाच्यत्वाद्यभावमादाय सर्व्वत्रैव व्यभिचारिण्यतिव्याप्तेर्दर्शितत्वात् साध्याभावमादाय व्यभिचारिविशेषेऽतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्कानवकाशः।

केचित्तु यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्येऽतिव्याप्तिर्व्विश्राम्यतु साध्याभावमादायाऽपि क्वचिदतिव्याप्तिः स्यात् सा च यावत्पदोपादानान्न भवतीत्यभिप्रायकतया न सन्दर्भविरोध इत्याहुः।

---

(१) साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणस्यैवेत्यर्थः। (२) भूतत्वाभाव-मनोन्यत्वाभावयोरित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परे तु ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताक-यावदभावनिवेशेनैवोपपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकप्रतियोगिताकयावदभावनिवेशनमफलं तादृशप्रतियोगिता-कत्वविशेषणव्यावर्त्तनीयस्य तत्तद्वह्न्याद्यभावस्य वह्नित्वव्यापक-प्रतियोगिताकत्वाभावेनोक्तविशेषणेनापि व्यावर्त्तनसम्भवात् अत-आह, 'अतएवेति यतः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेद-कप्रतियोगिताकाभावे यावत्त्वमुपात्तं न तु साध्यतावच्छेदकव्या-तकप्रतियोगिताकाभावे अतएवेत्यर्थः, 'भूतत्वेति, साध्यतावच्छे-दकव्यापकप्रतियोगिताकाभावनिवेशे भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वात् इत्यादौ भूतत्वाभाव-मनोऽन्यत्वाभावप्रतियोगिताया-उभयत्वाव्यापकत्वेन उभयत्वावच्छिन्नाभावादेरेव लक्षणघटकतया अतिव्याप्तिः स्यात् यथोक्तविशेषणाक्रान्ताभावनिवेशे च भूतत्व-मनो-ऽन्यत्वाभावानामपि लक्षणघटकतया नातिव्याप्तिरिति भावः(१) । न च साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतु-समानाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकता-दात्म्यसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः साध्यतावच्छेदकव्यापकप्रतियोगिताया लक्षणे अनिवेशे तादृश-व्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशास-म्भवात् प्रतियोगितावच्छेदकसम्बन्धेनैव तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रति-योगिसामानाधिकरण्यनिवेशे वह्निमान् धूमादित्यादौ हेतुसमा-

(१) नातिव्याप्तिरित्यर्थ इति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाधिकरणस्य वह्नित्वव्यापकप्रतियोगिताकस्य पर्व्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं पर्व्वतान्तर्भावेन नास्तीत्यव्याप्त्यापत्त्या तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासम्भवात् साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यमगत्या वाच्यं तथाच मनोभिन्नभेदस्य तेन सम्बन्धेन मूर्त्तत्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तेः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्यमाणस्थलान्तरेऽप्यतिव्याप्तिः (१) स्यादिति तु नास्माकं दोषः इत्यभिप्राय इति व्याचक्रुः। तत्समीचीनतया न प्रतिभाति साध्यतावच्छेदकेत्यादिविशेषणव्यावृत्तेः पश्चाद्वक्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदकेत्यादिविशेषणस्थले साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविशेषणं किन्नोपात्तमित्याकाङ्क्षोदयादादावेव तादृशविशेषणपरित्यागवीजकथनस्यासङ्गतत्वादिति।

'गोत्वाद्यभावस्येति, प्रतियोग्यसमानाधिकरणत्वादित्यर्थकेन 'अतथात्वादित्यनेनान्वयः, तथाच साध्यतावच्छेदकेत्याद्यनुपादाने चासम्भव इति भावः। यद्यपि गोत्वाभावादेरपि पूर्व्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यं पर्व्वतादावप्यस्ति तथापि व्यापकताया लक्षणाघटकत्वे भावरूपप्रतियोगिसामानाधिकरण्यं धूमवान् वह्नेरित्यादौ धूमाभावादेः पूर्व्वक्षणवृत्तित्व-

(१) घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकस्वाभावस्य साध्यतावच्छेदकदैशिकविशेषणताविशेषसम्बन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्ते-र्वारणायावश्यं विवक्षणीयं तथाचायमसम्भव इति भावः । साध्य-प्रतियोगिकाभावनिवेशे गोत्वाभावमादायासम्भवस्य वारणसम्भ-वात् 'तत्तत्साध्यव्यक्त्यभावस्येति, अस्य च नानाव्यक्तिसाध्यक-इत्यादिः, तथाच साध्याभावनिवेशेऽपि वह्निमान् धूमादित्यादा-वव्याप्तिः स्यादिति भावः । साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकत्वञ्च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगि-तानवच्छेदकत्वं, गुण-कर्म्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वाद्यभावीयप्रति-योगिताया न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं सत्त्वावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वादतो विशिष्टसत्ता-द्यभाव एव लक्षणघटकः तस्य च गुणादौ सत्तादिरूपप्रतियोगि-समानाधिकरणत्वादतिव्याप्तिरिति साध्यतावच्छेदकावच्छिन्नत्वो-पादानं, तथाच सति द्रव्यत्वाद्यभावीयप्रतियोगिताया अपि विशि-ष्टसत्तात्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशा-भावानाञ्च गुणादावतथात्वान्नातिव्याप्तिः । यत्किञ्चिद्रूपावच्छिन्न-साध्यवत्त्वनिवेशे च सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्याप-कतावच्छेदकप्रतियोगिताकद्रव्यत्वाभावादिकमादायाव्याप्तिर्बोध्या, साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम् अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः कालिकविशेषणता-विषयितादिसम्बन्धेन धूमादिमति काल-ज्ञानादौ संयोगादिसम्बन्धेन स्वावच्छिन्नाभावसत्त्वात् केनापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धेन न व्यापकतावच्छेदकत्वमिति केवलान्वयिवाच्यत्वादि-निष्ठप्रतियोगितैव स्वरूपादिसम्बन्धघटितव्यापकतावच्छेदिका स्यादित्यतिव्याप्तिः। न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयविषयतासम्बन्धावच्छिन्नप्रतियोगितावच्छेदिका या प्रमानिष्ठप्रतियोगिता तन्निरूपकप्रमाभावस्य च न विवक्षणीयसाध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन स्वविशिष्टयावद्वेत्वधिकरणे प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंयोगादिसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसम्बन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धस्यापि घटकतया तेन सम्बन्धेनायोगोलकादौ प्रतियोगिनोऽसत्त्वादिति वाच्यम्। यतो विषयताया विषयतात्वेनैव सम्बन्धता प्रामाणिकी न तु तथाविधविशेष्यतात्वेनेति, परन्तु तादृशदिशा समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेताविवातिव्याप्तिवारणं सम्भवति तत्र ज्ञानाभावस्य सम्बन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहात्। न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयसम्बन्धसामान्यावच्छिन्नप्रतियोगितायां धूमाद्यभावीयसम्बन्धसामान्यावच्छिन्नप्रतियोगित्वमप्यनवच्छेदकं संयोगत्वावच्छिन्नसंयोगादिसम्बन्धेन धूमादे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धूमादिमत्यभावसत्त्वेऽपि सम्बन्धत्वरूपव्यापकधर्म्मावच्छिन्न(१)-संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकतदभावासत्त्वात् तथाच धूमाद्यभावस्यापि लक्षणघटकतया तस्य च साध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्न-व्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन प्रतियोगि-सामानाधिकरण्यविरहान्नातिव्याप्तिरिति वाच्यम्। सम्बन्धत्वेन सम्बन्धानामभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावात् तेन रूपेण सम्बन्धानां व्यापकताघटकत्वासम्भवात्। वस्तुतस्तु प्रति-योगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वातन्त्र्येण निवेशस्य प्रतिक्षेप्यत्वात् ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिरस्त्येवेति ध्येयम्। वस्तुतस्तु संयोग-समवायादिसाधारणानुगतसम्बन्धत्वस्य कथञ्चित् सुवचत्वेऽपि तेन रूपेण संयोगादीनां संसर्गतया भानस्य निर्युक्ति-कतया व्यापकताशरीरे लाघवानुरोधात् साध्यप्रकारेणाधिकरणस्य निवेशे साध्यसम्बन्धो विशिष्य संसर्गतया निवेशनीयः तथाच वि-शिष्य साध्यतावच्छेदकसम्बन्धनिवेशनमावश्यकं यत्किञ्चित्सम्बन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विष-यितादिसम्बन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगिताया अपि व्यापकतावच्छेदकतया तादृशाभावस्य च पर्व्वतादौ प्रतियोगिसा-मानाधिकरण्यविरहात् असम्भवो बोध्यः। साध्यवन्निष्ठाभावाप्रति-योगिप्रतियोगिकत्वनिवेशे सर्व्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छि-न्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतो-

(१) सम्बन्धत्वरूपानुगतधर्म्मावच्छिन्नेति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽवच्छेदकगर्भता तादृशप्रतियोगितानवच्छेदकत्वञ्च तादृशप्रतियोगितायाः समानाधिकरणं सत् यदवच्छेदकं तदन्यत्वम्, अन्यथा व्यतिरेकिप्रतियोगितामात्रस्यैव व्यधिकरणधर्म्मतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्व-पटत्वोभयाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिप्रसङ्गात् ।

यत्तु साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वनिवेशेनैव सर्व्वसामञ्जस्ये निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलं वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्याद्यभावप्रतियोगिनां वह्न्यादीनां चालनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाभावमादायेव लक्षणसमन्वयसम्भवात् व्यभिचारिणि व्यभिचारनिरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारणसम्भवाच्च । न च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यम् । व्यापकतावच्छेदकघटकाभावप्रतियोगितावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नत्वस्याधिकस्य निवेशनीयत्वात् एतन्मते तदनिवेशेन लाघवात्, तन्मते तदनिवेशे सर्व्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयितादिसम्बन्धेन प्रतियोगिताविशिष्टस्याभावः (१) तत्प्रतियोगितावच्छेदकतया व्यापकतावच्छेदकप्रतियोगिताया एवाप्रसिद्ध्यापत्तेः,

(१) स्वावच्छिन्नस्याभाव इति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसम्बन्धावच्छिन्नत्व-स्यैतन्मते निवेशवद्भवन्मतेऽपि अभावप्रतियोगितायां तन्निवेशस्या-वश्यकतया तदंशे साम्यादिति। तदसत्, यतोऽनवच्छेदकप्रति-योगिकत्वम् अनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वं प्रतियोगि-तायां तन्निष्ठत्वञ्च स्वरूपसम्बन्धेन वाच्यम् अन्यथा वह्निमान् धूमादित्यादावपि विषयतासम्बन्धेन साध्यव्यापके प्रमेयमित्याका-रकविश्वविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावप्रतियोगि-ताया वृत्तेस्तादृशाभावस्य लक्षणघटकत्वापातात्। विषयिताया वृत्त्य-नियामकतया एतद्दोषानवकाश इति चेदेवमपि एतद्वह्निमान् एत-द्धूमात् एतद्रूपवान् एतद्रसादित्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकसाध्य-तत्समानाधिकरणकर्म्मादौ वर्त्तमानतया लक्षणघटकतापातात् तथाच व्यापकनिरूपितवृत्तौ स्वरूपसम्बन्धावच्छिन्नत्वनिवेशस्यैव तन्मतेऽप्यावश्यकतया न लाघवा-द्यवकाशो विपरीतमेव गौरवम् आधेयत्वांशाधिक्येनेति (१)। न च व्यापकनिष्ठप्रतियोगिताकत्वेन नाभावो विशेषणीयः येनोक्तं गौरवं स्यादपि तु अनुयोगितासम्बन्धेन व्यापकविशेषित एव तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेनाभावनिवेशापेक्षया लाघवम-क्षुस्समेवेति वाच्यम्। प्रतियोगिविशेषणतापन्नधर्म्मावच्छिन्ननिरू-पितत्वानवच्छिन्नानुयोगितायाः (२) अभावांशे प्रतियोगिसम्बन्ध-

---

(१) विपरीतगौरवमेवाधेयत्वनिवेशाधिक्येनेतीति पा०।

(२) प्रतियोगितावच्छेदकविशेषानवच्छिन्ननिरूपितत्वावच्छिन्नानुयोगितायाः इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तया भाने (१) पटादिमति घटत्वाद्यवच्छिन्नाभावविषयिन्या द्रव्यं नास्तीत्याकारिकायाः प्रतीतेरापत्तेः तदवच्छिन्ननिरूपितानुयोगितायाः एव संसर्गतया भानोपगमात् व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः संसर्गतया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नाभावस्य (२) सम्बन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथञ्चित् प्रसिद्धया लक्षणसमन्वयेऽपि व्यभिचारिण्यतिव्याप्तिः व्यभिचारनिरूपकाधिकरणेऽपि कस्यचित् साध्यव्यापकस्य वृत्तेः व्यधिकरणधर्म्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तिश्चेति। एवं अनवच्छेदकपदेन अवच्छेदकत्वपर्य्याप्त्यनधिकरणत्वमवश्यं वाच्यम् (३) अन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वाल्लक्षणाघटकत्वापत्तेः (४) तथाच घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिः वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकताया घटत्वविशिष्टपर्य्याप्ततया शुद्धघटस्य तत्-

---

(१) प्रतियोगितावच्छेदकविशेषावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगितायाः प्रतियोगिविशेषणतानापन्नधर्म्मावच्छिन्नप्रतियोगिताकत्वेनाभासमाने प्रतियोगिसम्बन्धतया भान इति पा०।

(२) हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्येति पा०।

(३) एवमनवच्छेदकपदेन अवच्छेदकानवच्छिन्नावच्छेदकताशून्यत्वपर्य्यन्तम् अवश्यं वक्तव्यमिति पा०।

(४) वह्निमन्निष्ठद्रव्यत्वाद्यवृत्तिघटत्वाद्यवच्छिन्नद्रव्यत्वादिमद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वात् लक्षणघटकत्वानुपपत्तेरिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर्य्याप्त्यनधिकरणत्वात् (१)। अथ निरुक्तव्यापकतायाः (२) निवेशे कपिसंयोगाभाववादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः कपिसंयोगाभाववादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगात्मकाभावप्रतियोगितावच्छेदकत्वादित्यग्रिमग्रन्थविरोधः। न च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्त्वात् साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम्। प्रकृते व्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात्।

अत्र केचित्, व्यापकतालक्षणेऽभावे प्रतियोगिवैयधिकरण्यमावश्यकम् अन्यथा अभावे सम्बन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान्द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तिर्य स्वावच्छिन्नाभावस्तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतया अतिव्याप्त्यापत्तेः। दैशिकविशेषणताविशेषसम्बन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन सम्बन्धेन वृत्तेरप्रामाणिकतया वह्निमान् धूमादित्यादौ पर्व्वतत्वाद्यभावनिष्ठप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकतापत्त्या पर्व्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात् हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि तादृशसम्बन्धावच्छिन्नत्वनिवेशने नानास्थाने तादृश-

---

(१) वह्निमद्भिन्नभेदप्रतियोगितावच्छेदकताया घटादिनिष्ठाया घटत्वाद्यवच्छिन्नत्वात् घटादेरपि निरुक्तव्यापकत्वाच्चतेरिति पा०।

(२) निरुक्तव्यापकतावच्छेदकताया इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिकरण-धर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकतावारणाय सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्य निवेशेन च गौरवात् अभावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितं, व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषासम्भवादेतन्मतेऽवच्छेदकतायां सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानिवेशनात् अभावीयवृत्तौ सम्बन्धभेदानिवेशाच्च। प्रतियोगिवैयधिकरण्यञ्च न प्रतियोगिसमानाधिकरणभिन्नत्वं तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगिसमानाधिकरणतया अभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठप्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादायाव्याप्त्यापत्तेः। किन्तु प्रतियोग्यनधिकरणवृत्तित्वं तथाच प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठात्यन्ताभावेत्यभावान्तार्थनिष्कर्षः। अत्र च व्यापकताघटकत्वेनाभिमतो यः सम्बन्धस्तेन प्रतियोग्यनधिकरणत्वं वाच्यं तेन कालपरिमाणादिसाध्यकस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः। कालः सर्व्ववान् कालपरिमाणादित्यादौ साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्ध्या तादृशसम्बन्धस्य व्यापकताघटकत्वासम्भवेऽपि न क्षतिः। तत्र समवायादिसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्। अथैवं दैशिकविशेषणतासम्बन्धस्य क्वापि व्यापकताघटकत्वं न स्यात् सर्व्वस्यैवाभावस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनस्तेन सम्बन्धेन साध्यवति वृत्तेः तेन सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः । न च तादृशसम्बन्धस्य व्यापकत्वाघटकत्वेऽपि क्षतिविरहः सामान्यादिमात्रवृत्तिसाध्यकस्थलेऽपि विषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वादिप्रकारकप्रमाभावमादायैवोपपत्तिसम्भवात् इति वाच्यम् । तादृशसम्बन्धस्यातथात्वे तेन सम्बन्धेन कपिसंयोगाभावादिसाध्यकमेयत्वादिहेतुकस्थले तन्निष्ठकपिसंयोगाद्यात्मकाभावीयप्रतियोगिताया-व्यापकतावच्छेदकत्वानुपपत्त्या अग्रिमग्रन्थासङ्गतितादवस्थ्यादिति चेन्न, लाघवानुरोधेन येन सम्बन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत्तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वमिति वक्तव्यम् इत्यञ्च कपिसंयोगाभावादिसाध्यकस्थले तन्निष्ठप्रतियोगित्वावच्छिन्नप्रतियोगिता नोक्तयादृशपदेनोपादातुं शक्यते तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसम्भवात् किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव, दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य (१) साध्यवति घटादौ सत्त्वात् तदनवच्छेदकत्वञ्च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेर्दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वनिर्व्वाहः, समनियततया अभावैक्यमते (२) घटाद्यभा-

(१) तदवच्छेदकवदनधिकरणत्वस्येति पा० ।

(२) समनियताभावैक्यमत इति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिरित्यतः प्रतियोगितावदनधिकरणत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशः। न च घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेऽपि तदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकतालक्षणसामञ्जस्यमिति वाच्यम्। तादृशाभावानामभेदे घटो नास्तीत्यादिप्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसम्भवाद्घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात्। समनियताभावानामभेदानभ्युपगन्तृमतेऽपि साध्याभावादिप्रतियोगितया साध्यवदवृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रतियोगितायां व्यापकतानवच्छेदकत्वापत्तिवारणाय तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम्। अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसम्बन्धघटितव्यापकतावच्छेदकत्वापत्तिः संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्या यादृशप्रतियोगितेत्यत्र तादृशप्रतियोगित्वावच्छिन्नायाः प्रतियोगिताया उपादातुमशक्यतया प्रतियोगितान्तरमुपादाय तत्रानवच्छेदकत्वान्तसत्त्वात् तथाच यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यासम्भवादसम्भवः, एवं समवायादिसम्बन्धावच्छिन्नाकाशनिष्ठप्रतियोगितायामपि तथात्वापत्तिः। न च संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतघट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वाद्यवच्छिन्नप्रतियोगिताकवङ्गाद्यभावाभिन्नतया संयोगादिना वङ्गादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वान्नासम्भव इतिवाच्यम्। एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशा-भावानां संयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्व्वा-रत्वात् मैवं, व्यापकताघटकसम्बन्धत्वेनाभिमतो यः सम्बन्धस्तेन सम्बन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगितायाः विशेषणीयत्वात्, द्रव्य-त्वादेः संयोगादिना अवृत्तितया उक्तदोषानवकाशादित्याहुः ।

वस्तुतस्तु लघुरूपसमनियतगुरुधर्म्मस्यानवच्छेदकत्वे घटाद्य-भावप्रतियोगिताया अपि वङ्गादिव्यापकतावच्छेदकत्वापत्तिः तादृशप्रतियोगिताविशिष्टघटाद्यभावप्रतियोगितायां लाघवेन घट-त्वादावेवावच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेद-कत्वात् । न च प्रतियोगितायास्तत्तदभावीयप्रतियोगितात्वेना-वच्छेदकतायां गौरवेऽपि स्वरूपतोऽवच्छेदकत्वेऽविशेषः, प्रति-योगितायाः स्वरूपतोभानाभावेन तेन रूपेणावच्छेदकताया-अप्यसम्भवादिति पारिभाषिकमवच्छेदकत्वं व्यापकताशरीरे निवे-शनीयं तथाच साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्म्म-स्तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकं फलतः साध्यवद्-यत्किञ्चिद्वृत्त्यसम्बद्धस्वविशिष्टसामान्यकं यद्यत् स्वं तदन्यत्वमेव व्यापकतावच्छेदकत्वं, तथाच कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमना-यासेनैव निर्व्वहति यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगिता-विशिष्टस्य सर्व्वत्रैव साध्यवति वृत्तेः तस्याः स्वपदेनोपादातु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मशक्यत्वात् तादृशं स्वं धर्म्मान्तरमेव तदन्यत्वञ्च तादृशप्रतियोगितायामक्षतमिति। स्वसम्बद्धत्वशरीरेऽपि व्यापकताघटकत्वेनाभिमतो यः सम्बन्धः स एव निवेशनीयः, द्रव्यत्वादिनिष्ठप्रतियोगित्वञ्च संयोगादिसम्बन्धेन साध्यवदसम्बद्धस्वविशिष्टसामान्यकमेवातो न संयोगादिघटितव्यापकतावच्छेदकत्वन्तस्येति नोक्तदोषावकाश इति दिक्।

तत्त्वचिन्तामणिदीधितिः।

येन सम्बन्धेन हेतुः तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः, एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः।

गादाधरी विवृतिः।

'येन सम्बन्धेन हेतुरिति व्याप्यताघटकत्वेनाभिमतो यः सम्बन्ध इत्यर्थः, 'बोध्यमित्यस्य हेतुसामानाधिकरण्यघटकमित्यादिः, 'तेन' तादृशसम्बन्धविवक्षणेन, 'आत्मत्वे साध्य इति अयमात्मा ज्ञानादित्यादावित्यर्थः, 'साध्याभावस्य' साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य, 'अतथात्वेऽपि' स्वविशिष्टस्य हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्याप्रसिद्ध्या विवक्षणीयस्वप्रतियोगिसामानाधिकरण्यविरहेऽपि, (१) 'न क्षतिः' नाव्याप्तिः, वह्नि-

(१) विवक्षणीयस्वप्रतियोगिसामानाधिकरण्यासम्भवेऽपीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मान् धूमादित्यादौ धूमावयवादिवृत्तेर्व्वह्नित्वाद्यवच्छिन्नवह्न्या-द्यभावस्य स्वविशिष्टं यद्धेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तदवच्छेदेन प्रतियोगिसामाधिकरण्यं सम्भवत्येव तथाविधहेत्व-धिकरणस्य पर्व्वतादेर्जन्यमात्रस्य कालोपाधितया कालिकसम्बन्धेन तादृशाभावविशिष्टत्वात् तदन्तर्भावेन तेन सम्बन्धेन तादृश-प्रतियोगिसामानाधिकरण्यस्यापि सत्त्वात्। अभाववैशिष्ट्यादौ सम्बन्धविशेषानिवेशादित्यभिप्रायेन नित्यमात्रवृत्तिहेतुकस्थला-नुधावनम्। अथ वह्निव्यापकस्य चरमक्रियाभावस्य योऽभाव-श्चरमक्रियात्मकस्तस्य कालिकसम्बन्धेन हेत्वधिकरणे महाकाले वर्त्तमानस्य न विवक्षणीयप्रतियोगिसामानाधिकरण्यस्य सम्भवः स्वविशिष्टस्य हेतुतावच्छेदकसंयोगेन धूमाधिकरणस्याप्रसिद्धेः धूमाधिकरणपर्व्वतादेस्तदसमानकालीनतया तत्र कालिकसम्बन्धे-नापि तद्वैशिष्ट्यासम्भवादित्यात्मत्वसाध्यकपर्य्यन्तानुधावनमफलम्। न च वृत्त्यनियामकसंयोगेन धूमसम्बन्धिनि परमाणावेव चरम-क्रियावैशिष्ट्यस्य प्रसिद्धा तत्र चरमक्रियाभावप्रतियोगिनोऽपि सत्त्वात् सम्भवत्येव विवक्षणीयप्रतियोगिसमानाधिकरण्यं तादा-त्म्यसम्बन्धावच्छिन्नहेतुकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसम्बन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यम्। यादृशपरमाणौ कदापि धूमसंयोगो नासीत्तदीयचरमक्रियाद्यात्मकाभाववैशिष्ट्यस्य हेतुसम्बन्धिन्यसत्त्वेन तमादायैवाव्याप्तिवारणासम्भवादिति चेन्न, महाकालस्यैव वृत्त्यनियामकसंयोगसम्बन्धेन हेतुसम्बन्धितया तत्र कालिकसम्बन्धेन चरमकियात्मकाभाववैशिष्ट्यस्य दैशिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवात्, वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात्। न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरस्त्येवेति वाच्यम्। तेन रूपेण सम्बन्धतायां मानाभावात् कालस्यावृत्तितया काले धूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वाच्च वह्निमान् धूमादित्यादौ साध्याभावमादाय नाव्याप्तिसम्भवः किन्तु चरमक्रियात्मकाभावमादायैवेति, अव्याप्तेः स्फुटतरप्रतिपत्त्यर्थमात्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति। ननु ज्ञानवानात्म-महाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः। न च तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव काले न प्रतियोगिसमानाधिकरणः आत्मनोऽवृत्तितया कालिकसम्बन्धेनाप्यवृत्तेरिति वाच्यम्। आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात्। नित्यद्रव्याणां कालावृत्तित्वेऽपि महाकालभिन्नो द्रव्यत्वात् ईश्वरज्ञानभिन्नं गुणत्वादित्यादावतिव्याप्तिः वृत्तिमतामेव महाकालभेदेश्वरज्ञानभेदादीनां व्यापकतया तदभावानां यावतामेव महाकाले ईश्वरज्ञानादौ कालिकविशेषणता-विषयितादिसम्बन्धघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह, 'एवं दलान्तरेऽपीति, 'दलान्तरे' प्रतियो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गिसामानाधिकरण्यघटकप्रतियोगिमत्तादले, 'सम्बन्धभेदनिबन्धनो-दोषः' कालिकादिसम्बन्धमादायातिव्याप्तिरूपः, 'सम्बन्धैक्यविवक्षया' व्यापकताघटकसम्बन्ध-प्रतियोगिमत्ताघटकसम्बन्धयोरैक्य-विवक्षया, तथाच ज्ञानवानात्म-महाकालान्यतरत्वात् महाकालभि-न्नोद्रव्यत्वादित्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्या-प्यतानिरूपितव्यापकताघटकसमवाय-दैशिकविशेषणतादिसम्बन्धेन ज्ञानाभाव-महाकालभेदाभावादिप्रतियोगिनां (१) कालादाववृत्ते-र्नातिव्याप्तिरिति भावः। अत्र च येन येन सम्बन्धेन स्वप्रतियोगि-त्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्षणीयम् अन्यथा इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ हेतुसमानाधि-करणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयिता-सम्बन्धेनापि व्यापकतया तेन सम्बन्धेन हेत्वधिकरणेश्वरेच्छा-कृत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः येन येनेत्युक्तौ च तथा-विधसमवायादिसम्बन्धेनातथात्वात् नातिव्याप्तिः। अत्र च साध्य-तावच्छेदकावच्छिन्ननिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघट-कसम्बन्धत्वेन तादृशसम्बन्धस्य प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशस्तथा सति अभावे साध्यतावच्छेदका-वच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात्। न हि तादृशविशेषणानुपादाने गोत्वाद्यभावमादायासम्भवः सम्भ-वति, गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्व्वक्षणवृत्तित्वविशिष्ट-

(१) ज्ञानाभाव महाकालादिभेदाभावप्रतियोगिनामिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वाभावरूपप्रतियोगिना तन्निष्ठव्यापकताघटकदैशिकविशेषणता-सम्बन्धेन सामानाधिकरण्यसत्त्वात्, धूमवान् वह्नेरित्यादौ धूमाद्यभावस्यायोगोलके पूर्व्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगि-सामानाधिकरण्येऽपि यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविरहात्। घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियोगिसामानाधिकरण्येऽपि विशिष्यतासम्बन्धघटितसाध्यव्यापकावच्छेदकप्रतियोगिताकस्य घटावृत्तेर्घटत्वाभावादिप्रमायाः तादृशसम्बन्धेनाभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गततादृशसम्बन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्त्यनवकाशात्। अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितयद्यत्सम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताका ये येऽभावास्तत्तत्सम्बन्धेन प्रतियोगि-समानाधिकरणाः एवं क्रमेणैव निवेशाद्व्यापकताया एकधैव लक्षणे निवेश इति।

यत्तु साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्य-निवेशात् न ज्ञानवानात्म-महाकालान्यतरत्वादित्यादावतिव्याप्तिः, इत्यत्र व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या, तेन वह्निमान् धूमादित्यादौ घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वत्वा-दिना वा द्रव्यत्वादेरभावस्य समवायादिसम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति, तन्न, तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालत्वादिहेतावतिव्याप्त्यापत्तेः तत्र महाकालान्यत्वविशिष्ट-घटाभाव-महाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वादिति। यदि च महा-कालान्यत्वविशिष्टोऽपि घटो महाकाले वर्त्तते अन्यथा सिद्धान्त-लक्षणे महाकालो घटवान् कालपरिमाणादित्यादौ महाकाला-न्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य सुलभतया उभ-याभावघटितप्रतियोगिवैयधिकरण्यनिर्व्वचनायासस्य निष्प्रयोजन-कतापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरे-वेति मन्यते तदापि घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वात्म-कस्याभावस्य साध्यतावच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चि-द्विशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्ति--रेतन्मते दुर्व्वारैव। न च तेन सम्बन्धेन भावरूपप्रतियोगिसामाना-धिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यम्। तथा-सत्यभावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याद्य-भावस्य भावरूपप्रतियोग्यप्रसिद्ध्या भावरूपप्रतियोगिसामानाधि-करण्यासम्भवादव्याप्तिः, अभावपदस्य भावभिन्नाभावपरत्वे कपि-संयोगाभावसाध्यकस्थले कपिसंयोगात्मकाभावमादायाग्रे स्वविशि-ष्टपदव्यावृत्तिकथनस्यासङ्गत्यापत्तेः। एवं साध्यतावच्छेदकसम्ब-न्धेन व्यापकत्वादिनिवेशे 'सर्व्वत्रेत्यादिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेश्चेति।

यत्तु दैशिकविशेषणताविशेषेण व्यापकता तेनैव च सम्बन्धेन प्रतियोगिसामानाधिकरण्यं सर्व्वत्र साध्यवत्त्वप्रकारकप्रमाविषय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वाभावमादायैव लक्षणसङ्गमनमतिव्याप्तिवारणञ्चेति, तदपि उक्ताऽतिव्याप्तेः (१) आत्मत्वादिसाध्यकस्थले साध्याभावमादाय हेतुतावच्छेदकसम्बन्धव्यावृत्तिप्रदर्शनविरोधाच्चानुपादेयमेव।

केचित्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामाधिकरण्यनिवेशान्न प्रागुक्तातिव्याप्तिः, इत्थञ्च व्यापकतापि तेन सम्बन्धेनैव वाच्या अतो वह्निमान् धूमादित्यादौ संयोगादिघटितव्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः तादृशाभावानां साध्यतावच्छेदकसम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितव्यापकतावच्छेदकप्रतियोगिताकत्वेऽपि स्वप्रतियोगितावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन निरुक्तयावदभावान्तःपातित्वात्। न चैवं व्यधिकरणधर्म्मावच्छिन्नाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति वाच्यम्। संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात्तादृशाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वात् (२) अनुभवानादरे तु समानाधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वासिद्धेः। अथ बाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य सम्ब-

---

(१) पटत्वाभाववान् प्रमेयत्वादित्यादावतिव्याप्तेरित्यर्थः।

(२) सम्बन्धावच्छिन्नत्वादिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्धावच्छिन्नप्रतियोगिताकत्वमावश्यकम् अन्यथा एकैकविध-घटाद्यभावज्ञानस्य संयोग-समवायादिरूपनिखिलसंसर्गावगाहि-ज्ञानप्रतिबन्धकत्वप्रसङ्गात् (१)। न च संयोगादिसम्बन्धावच्छिन्न-घटादिप्रकारताकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादि-मत्ताविरोधी योऽभावस्तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग-इति वाच्यम्। वास्तवतादृशाभावज्ञानत्वादिना प्रतिबन्धकत्वे घटाभावत्वेन पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानाविरो-धित्वप्रसङ्गात् (२) तस्मात् तत्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गा-वच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनैव प्रतिबन्धकताया-वक्तव्यतया समानाधिकरणधर्म्मावच्छिन्नप्रतियोगितायां सम्बन्ध-स्यावच्छेदकतासिद्धिरिति चेत्, तर्हि घटत्वविशिष्टपटाद्यवगाहि-भ्रम-घटत्वादिनापटाद्यभावज्ञानयोरपि प्रतिबध्य-प्रतिबन्धक-भावस्य सत्त्वात् तादृशप्रतिबध्य-प्रतिबन्धकभावस्य सम्बन्धविशेष-नियन्त्रितत्वानुरोधेन व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वावश्यकत्वाद्व्यधिकरणधर्म्मावच्छिन्नाभावज्ञानस्या-प्रतिबन्धकत्वे बाधग्रन्थे लाघवोपनीतकाञ्चनमयत्वादिना वह्न्या-द्यनुमितिविरोधितया काञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताक-वह्न्याद्यभावस्य हेत्वाभासतोक्तेरसङ्गत्यापत्तेरित्यलमप्रस्तुतविचारे-णेति वदन्ति। तदपि न साधीयः, निखिलाभावस्य किञ्चि-

---

(१) ज्ञानविरोधित्वप्रसङ्गादिति पा०।

(२) न चेत्यादिः ज्ञानाविरोधित्वप्रसङ्गादित्यन्तः पाठः कस्मिंश्चिदादर्शपुस्तके नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसमानाधिकरणत्वसत्त्वेन व्यभिचारिण्यतिव्याप्तेः। यावत्प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे च निखिलव्यधिकरणधर्म्मावच्छिन्नाभावानामैक्यमते निखिलसम्बन्धानामेवैकैकतादृशाभावप्रतियोगितावच्छेदकतया क्वचिदपि हेत्वधिकरणे संयोग-विषयित्वादिरूपसकलसम्बन्धेन प्रतियोगिनोऽवृत्तेरसम्भवापत्तेः प्रकारान्तरानुसरणे च (१) गौरवादिति।

तत्त्वचिन्तामणि-दीधितिः।

रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव। प्रलये परमाणावुत्पत्तिकाले चावयविनि तत्सत्त्वात्। न च प्रतियोगिवत्तद्ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वं, मानाभावात् अतएव अन्तरा श्यामे रक्तं रूपं नास्तीतिप्रत्ययः, न चैष रक्तिमध्वंसाद्यवगाही, पूर्व्वापररक्तिमध्वंस-प्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात्। तत्सामानाधिकरण्यञ्च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्व-जन्यद्रव्यत्व-प्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्मावच्छेदेन तद्वति काले

---

(१) साध्यवत्त्वव्यापकाधिकरणतानिरूपितस्वप्रतियोगिनिष्ठाधेयतावच्छेदकस्वप्रतियोगितावच्छेदकयावत्सम्बन्धेन प्रतियोगिसामानाधिकरण्योक्तौ चेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसङ्गः हेतुमति प्रलये तत्सामानाधिकरण्याभावात्। स्वविशिष्टेतिविशेषणात् कपिसंयोगाभाववान् मेयत्वादित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः, जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रत्ययप्रसङ्गात्।

गादाधरी-विवृतिः।

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वा अभावस्य निवेशे उभयत्वावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिरुक्ता न तु रूपसामान्याभावादिसाध्यकस्थले, प्राचां मते विरुद्धे पृथिवीत्वादिहेतावित्यत्र किं वीजं तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपस्य (१) स्वध्वंस-प्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेनातिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य स्वमते लक्ष्यत्वमेवोपपादयति, 'रूपादीति। यथोक्तलक्षणेऽतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः तत्र पृथिव्यन्यत्वाभावस्यापि

(१) रूपाद्यात्मकाभावस्येति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावदन्तर्गततया तस्य पृथिव्यां प्रतियोगिसामानाधिकरण्यासम्भवे-नातिव्याप्तेरनवकाशात् (१)।

यत्तु उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन पृथिव्यन्यत्वाभावस्य न रूपसामान्याभावव्यापकतावच्छेद-कप्रतियोगिताकतेत्यभिसन्धिपूर्व्विकां प्राचीनप्रवादमात्रेणासद्धेतु-त्वाभिमानिनां तटस्थानं यथोक्तलक्षणेऽतिव्याप्तिशङ्कां निराकरोति, 'रूपादीति, 'सद्धेतुरेवेति यादृशरीत्या पृथिव्यन्यत्वाभावस्य लक्षणा-घटकत्वोपपत्तिः तादृशरीत्या साध्यवति हेतुमत्ताया अप्यावश्यक-तया सद्धेतुरेवेत्यर्थः, इति व्याख्यानं, तदनुपादेयमेव, तादृशा-शङ्कितुः पृथिव्यां रूपसामान्याभावसत्त्वेऽविप्रतिपत्तावेवातिव्याप्ति-शङ्कासम्भवेनाग्रे पृथिव्यां रूपसामान्याभावव्यवस्थापनौपयिकाकाङ्क्षा-नुत्पत्त्या तदसङ्गत्यापत्तेः।

'प्रलये' महाप्रलये, परमाणूनां नित्यतया तत्रोत्पत्तिकाला-वच्छेदेन रूपसामान्याभावासम्भव इति भावः। यद्यपि पाका-द्रूपनाशोत्पत्तिकाले पूर्व्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरा-नुत्पादेन तदानीमपि परमाणौ रूपसामान्याभावसम्भवः। तथाप्य-विनश्यदवस्थस्य रूपस्य रूपप्रतिबन्धकत्वे पूर्व्वरूपनाशोत्पत्ति-क्षण एव पाकजरूपान्तरोत्पत्तिसम्भव इत्यभिप्रायेण प्रलयपर्य्यन्ता-नुधावनं, 'उत्पत्तिकाल इति, अवयविद्रव्यस्य जन्यतया प्रलये-ऽसत्त्वात्तदवच्छेदेन तत्राभावासम्भव इति भावः। 'तत्सत्त्वात्' रूपादिसामान्याभावसत्त्वात्। ननु सामान्यधर्म्मावच्छिन्नप्रति-

(१) अतिव्याप्त्यभावादिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिताकाभावस्य अत्यन्ताभावात्मकतया रूपप्रागभाववदुत्पत्ति-कालावच्छिन्नावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसम्भवः ध्वंस-प्रागभावयोरत्यन्ताभावविरोधि-त्वादित्याशङ्कां निरस्यति, 'न चेति, 'प्रतियोगिवदिति यथा प्रतियोगिन एककालावच्छिन्नैकदेशावृत्तित्वरूपस्वात्यन्ताभावविरोधिता तथा ध्वंस-प्रागभावयोरप्यत्यन्ताभावविरोधितेति नेत्यर्थः, 'मानाभावादिति। ननु रूपध्वंस-प्रागभावावच्छिन्नाधिकरणे तद-त्यन्ताभावस्य वृत्तौ प्रमाणाभावः घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुत-रामसम्भवात् द्वितीयादिक्षणावच्छेदेन रूपस्यैव तत्रोत्पत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृश-प्रत्यक्षासम्भवात् अनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमनुद्भाव्य निरसितुमशक्यत्वात् अनुमानञ्चाप्रयोजकमिति ध्वंस-प्रागभाव-योरत्यन्ताभावविरोधित्वमर्थायातमित्यत आह, 'अतएवेति ध्वंस-प्रागभावयोरत्यन्ताभावाविरोधित्वादेव, 'अन्तरा श्यामे' पूर्व्वा-परदशायां रक्ते मध्यदशायां श्याम इत्यर्थः, 'रक्तं रूपं नास्तीति प्रत्यय इति, ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्व्व-रक्तध्वंस-भाविरक्तप्रागभावयोः सत्त्वेनात्यन्ताभावावगाहिन्याः प्रमा-त्मकतादृशप्रतीतेरनुपपत्तिरिति भावः। 'एषः' रक्तः रूपं नास्तीति-प्रत्ययः, 'ध्वंसादीत्यादिना प्रागभावपरिग्रहः, 'पूर्व्वापरेति यत्र घटादौ पाकादेव रक्तनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशा-नन्तरञ्च रक्तान्तरं ततस्तन्नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्तान्तरमुत्पत्स्यति तत्र मध्यरक्तदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः, तत्रापि रक्तरूपध्वंस-प्रागभावयोः सत्त्वादिति भावः। एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत् तादृशावेव (१) ध्वंस-प्रागभावावेतादृशप्रतीतिविषयौ अन्तरा रक्तसमानकालीनौ पूर्व्वापररक्तध्वंस-प्रागभावौ च न तथाविधाविति नातिप्रसङ्ग इति निरस्तम्। तादृशध्वंस-प्रागभावयोरेव (२) रूपान्तरदशायां तादृशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्यावश्यकत्वात्। तत्र मध्यमरक्तरूपध्वंस-प्रागभावयोस्तथात्वस्वीकारे च पूर्व्वापररक्तदशायां तादृशप्रत्ययापत्तेः। अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंस-प्रागभावावेव तादृशप्रतीतिविषयौ इत्यत्र रक्तरूपदशायां लौकिकप्रत्यक्षात्मकस्तादृशप्रत्यय आपाद्यते अनुमित्यात्मको वा आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षं प्रति प्रतिबन्धकत्वान्नापत्तिः अन्यथा भवन्मतेऽपि रूपान्तरकालावच्छेदेन तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं धर्म्मान्तरघटितसन्निकर्षात्तद्वृत्तितया प्रत्यक्षापत्तेः विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्याहेतुत्वात् (३) रक्तरूपग्रहप्रतिबन्धकदोषादिसत्त्वे च तादृशप्रत्ययस्येष्टत्वात्। नान्त्यः तद्रूपावच्छिन्नव्याप्यवत्ताज्ञानादिसत्त्वे आनुमानिकतथाविधप्रत्यय-

(१) रक्तत्वावच्छिन्नप्रतियोगिताकावेवेत्यर्थः।

(२) रक्तसमानकालीनध्वंस प्रागभावयोरेवेत्यर्थः।

(३) विशेष्यभेदेनानन्तकार्य्य-कारणभावप्रसङ्गेनेत्यादिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्येष्टत्वात्। न च तादृशप्रत्ययस्य प्रमात्वापत्तिः, भवन्मतेऽपि तथाविधात्यन्ताभावस्य तत्र सत्त्वात्तादृशप्रत्ययस्य प्रमात्वेनेष्टापत्तेः। यदा च तत्र रक्तं रूपं तत्कालावगाहिन इदानीमत्र रक्तं रूपं नास्तीतिप्रत्ययस्य प्रमात्वं पुनरशक्यापादनं तादृशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात् यदा च तत्र न रक्तं रूपं तत्कालावच्छेदेनैव ध्वंस-प्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात् तद्धर्म्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनरिष्टमेव। न च तद्धर्म्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते किं वा तत्कालावच्छेदेन तद्धर्म्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यत इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धिर्निष्प्रत्यूहैवेति वाच्यम्। ध्वंस-प्रागभावाधिकरणेऽत्यन्ताभावाकल्पने ध्वंसादेरतिरिक्तात्यन्ताभावाकल्पनेन लाघवात् रक्तरूपात्यन्ताभावस्यैतन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात्। मैवम्। तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमे विशेषाभावानामेवाधिकरणविशेषवृत्तित्वावच्छेदेन सामान्यधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्भवात् अतिरिक्तसामान्याभावाप्रसिद्धिप्रसङ्गः। एवमेकस्यैवाभावस्य चाधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेन घटत्व-पटत्वादिरूपनानाधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्भवेनाभावभेदविलोपप्रसङ्गः। एवं रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पगमे तत्समानाधिकरणतदसमनियतध्वंसान्तरस्य (१) तत्स-मानाधिकरणस्यैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पना-मादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंस-प्रागभावाधिकरणेऽत्य-न्ताभावकल्पनमेव न्याय्यम्। अथैतादृशयुक्त्या रक्तध्वंसादिमति तद-त्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्ना-भावो निर्युक्तिक एवेति चेन्न, रूपोत्पत्तिद्वितीयादिक्षणे पुनस्तद-धिकरणे सामान्यसामग्रीबलाद्रूपान्तरोत्पत्तिवारणाय रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम् एवञ्च उत्पत्तिकाले पाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तदुत्तरं रूपानुत्पादप्रसङ्गः रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पाद-प्रसङ्गश्च प्रागभावहेतुतयापि दुर्व्वारः रूपवत्यपि पाकजभाविरूप-प्रागभावसत्त्वात्। नचैवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिकः यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्काला-वच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणै-वोपपत्तिरिति वाच्यम्। दत्तोत्तरत्वात्। इदन्त्ववधेयम् उक्तयुक्त्या उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि प्रलयकालावच्छेदेन परमाणौ तत्सत्त्वे मानाभावः, एवं रूपं प्रति रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते स्पर्शोत्पत्त्यनुरोधेनावश्य-कल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरा-पत्तेः शक्यवारणत्वात्, वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणस्य स्पर्शं प्रति रूपाभावहेतुतया अशक्यत्वात् तत्र स्पर्शाभावहेतुताया-

---

(१) तत्समानाधिकरणतत्समनियतसंयोगविशेषादिध्वंसान्तरस्येति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवश्यकत्वात्। न च रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद्रूपसत्त्व एव स्पर्शनाशस्तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्। एकजातीयस्यैवाग्निसंयोगस्य रूप-रस-गन्ध-स्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्यावश्यकत्वादिति। ध्वंस-प्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदनधिकरणेषु कल्प्यते अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवादेकैकेषु तद्धर्मावच्छिन्नवह्न्यादिषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनयैवोपपत्तेरिति ध्येयम्। 'तत्सामानाधिकरण्यं' प्रतियोगिसामानाधिकरण्यं, 'स्वविशिष्टेति, स्वं यत्राभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यं स एव, 'हेत्वधिकरणावच्छेदेनेति हेतुतावच्छेदकसम्बन्धेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तत्सामान्यान्तर्भावेनेत्यर्थः, तेन वह्न्याद्यभावस्य धूमावयवाद्यवच्छेदेन द्रव्यं विशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य गुणाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः। पर्व्वतादेः कालोपाधित्वानभ्युपगमे धूमवत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्यतया धूमवान् वह्नेरित्यादावतिव्याप्त्यप्रसक्तेर्दर्शितविवक्षायाः स्थलान्तरे प्रयोजनमाह, 'तेन गोत्वेति, 'तद्वति' गवादिमति, कालिकसम्बन्धेन गोत्वादिना गवादौ साध्ये प्रलयान्तर्भावेन व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकानां गोत्वाद्यवच्छिन्नाभावानां गवादिमति एतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले तादृशदेशावच्छेदेन प्रलयादिकालावच्छेदेन च वर्त्तमानतया प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिसामानाधिकरण्यमक्षतमेव, एवं दैशिकविशेषणताविशेषेण गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन सम्बन्धेन प्रलयान्यत्वादिमति महाकाले कालिकसम्बन्धेन वर्त्तमानतया प्रतियोगिसमानाधिकरण एव प्रतियोगिसामानाधिकरण्यघटकीभूताभावीयवृत्तौ सम्बन्धविशेषानिवेशादित्यतिव्याप्तिः स्यात्, निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रलयान्तर्भावेन तादृशाभावानां न प्रतियोगिसामानाधिकरण्यं तत्र प्रतियोगिनोऽवृत्तेरिति समुदायार्थः। गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरमध्वंसादिस्तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधिकरण्यमिति न तत्र तद्व्याप्तिरतो 'महाकाले वेत्युक्तं, महाकाले च कालिकसम्बन्धेन वृत्तेस्तथात्वमक्षतमेव। गोसाध्यकस्थले साध्यव्यापकतावच्छेदकजन्यद्रव्यत्व-प्रलयावृत्तित्वाद्यवच्छिन्नाभावमादायातिव्याप्तिवारणं न सम्भवतीति स्फुटीकरणाय तद्रूपावच्छिन्नसाध्यकस्थलेऽप्यतिव्याप्तिमाह, 'यत्र कालत्वमित्यादिना। अथैतादृशविवक्षापेक्षया लाघवात् प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौ दैशिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वमेव निवेश्यतां तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रलयान्यत्वादेरभावस्य प्रतियोगिसामान्याधिकरण्यविरहेणातिव्याप्त्युद्धारस्य शक्यत्वात्। न चैवं वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन हेत्वधिकरणवृत्तेर्द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावादव्याप्तिरिति वाच्यम्। हेतुसामानाधिकरण्यशरीरेऽपि अभावीयवृत्तौ दैशिकविशेषण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तासम्बन्धावच्छिन्नत्वस्यैव निवेशनीयत्वात् तावतापि लाघवानपायात्। न च दैशिकविशिष्टताविशेषेण प्रतियोगिसामानाधिकरण्यनिवेशेऽपि उक्तस्थलेऽतिव्याप्तिस्तदवस्थैव प्रलयान्यत्वाभावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधिकरणस्वरूपत्वात् तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणे परमाणौ वृत्तेरिति वाच्यम्। एवमपि प्रलयान्यकालत्वप्रकारकप्रमाविशेष्यत्वादेरभावस्य प्रलयातिरिक्तगगनादावपि वर्त्तमानस्य प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरुपपादतया अतिव्याप्त्यनवकाशात्। मैवम्। दैशिकविशेषणतया प्रतियोगिसामानाधिकरण्यनिवेशेऽपि दैशिकविशेषणतासम्बन्धेन प्रलयावृत्तिसाध्यके कालत्वादिहेतावतिव्याप्तिर्दुर्वारैव तत्र प्रलयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसम्बन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावप्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलयात्मकत्वान्निरुक्तरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतरसम्बन्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयान्यवृत्तितया सुतरामेव प्रतियोगिसमानाधिकरणत्वादिति निरुक्तविवक्षणमावश्यकम् एतदभिप्रेत्यैव प्रलयावृत्तिसाध्यकानुसरणं ग्रन्थकृत इति। वस्तुतस्तु प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि दर्शितस्थलेषूक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यं प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपविशेषसम्बन्धेन प्रलयात्मकनानाध्वंसान्तर्गतयत्किञ्चिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरू-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पप्रतियोगिनोऽधिकरणे ध्वंसान्तरे स्वस्य प्रतियोगिसमानाधिकरणत्वात् यत्किञ्चिद्ध्वंसान्यत्वाभावस्य यत्किञ्चिद्ध्वंसमात्रवृत्तेस्तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरेऽसत्त्वेऽपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव तत्प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यविषयकत्वोपलक्षितप्रमाया विषयतासम्बन्धेन केवलान्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः प्रलयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलय-तदन्यविषयकप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तित्वेन प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेस्तादृशाभावमादायाप्यतिव्याप्तिवारणासम्भवात् प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतियोगिभेदेन भिन्नतया प्रलयान्यभेदप्रतियोगिताया न तादात्म्येन साध्यव्यापकतायामवच्छेदकत्वमिति तादृशभेदस्याधिकरणे प्रलयान्यरूपप्रतियोगिनस्तेन सम्बन्धेनासत्त्वेऽपि नातिव्याप्त्युद्धारः (१)। उक्तविवक्षणे तु प्रलये प्रलयाविषयकप्रमाभावस्य (२) विषयतया प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिवारणसम्भवः। एवमुक्तरीत्या घटत्वाभाववान्मेयत्वा-

(१) प्रतियोगितायाः इत्यादिः नातिव्याप्त्युद्धार इत्यन्तः पाठः कस्मिंश्चिदादर्शपुस्तके नास्ति।

(२) प्रलये प्रलयाविशेष्यकप्रलयान्यत्वप्रकारकयावत्प्रलयान्यविशेष्यकप्रमाभावस्येति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दित्यादावपि व्यावृत्तिर्बोध्या। 'हेतुमति प्रलय इति हेतुमत्-सामान्यान्तर्गतप्रलयान्तर्भावेनेत्यर्थः, 'तत्सामानाधिकरण्याभावात्' गवादिरूपप्रतियोगिसामानाधिकरण्याभावात्, अत्र 'गवादेरभाव-स्येत्यनुषज्यते। हेतुमति स्ववैशिष्ट्यदलनिवेशनस्य फलमाह, 'स्व-विशिष्टेतीति, साम्प्रदायिकैर्द्रव्ये संयोगसामान्याभावानभ्युपगमात् सद्धेतुत्वार्थं कपिसंयोगाभावपर्य्यन्तानुधावनं, 'सकलहेत्वधिकरणा-वृत्तित्वेऽपीति, नित्यगुणादौ कपिसंयोगासत्त्वादिति भावः, एतेन हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगिसामानाधिकरण्यं नास्ती-तिसूचितम्। 'नाव्याप्तिरिति, नित्यगुणादेः स्वविशिष्टत्वाभावात्तद-न्तर्भावेनातथात्वेऽपि स्वविशिष्टहेत्वधिकरणान्तर्भावेन तथात्वस्या-क्षतत्वात्। अतोक्तयुक्त्या व्यापकताघटकाभावे प्रतियोगिवैयधिक-रण्यस्य निवेशनीयतया साध्यवद्‌यत्किञ्चिद्व्यक्त्यसम्बद्धस्वविशिष्टसा-मान्यकभिन्नत्वरूपव्यापकतावच्छेदकत्वस्य वा निवेशनीयतया कपि-संयोगाभावादिनिष्ठप्रतियोगिताया अपि व्यापकतावच्छेदकता-निर्व्वाह इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादायाव्याप्तिरा-शङ्किता अन्यथा पुनः सत्तावान् जातेरित्यादौ काले कालिक-सम्बन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नाभावानां हेत्व-धिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेन प्रतियोगिसामानाधि-करण्यविरहात् प्रसक्ताव्याप्तेर्व्वारणाय 'स्वविशिष्टेतिविशेषणमा-वश्यकमिति, आदिपदग्राह्यमपि तादृशस्थलमेवेति बोध्यम्। अत्र च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगि-ताका यावन्तोऽभावाः प्रत्येकं हेतुतावच्छेदकविशिष्टाधिकरण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामान्यान्तर्भावेन तत्प्रतियोगिसामानाधिकरण्यं तादृशा यावन्तोऽभावा यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकास्तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशिष्णाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितञ्च व्यधिकरणधर्म्मावच्छिन्नाभावघटितलघुलक्षणं सम्भवतीति बोध्यम्। ननु धूमवान् वह्नेरित्यादावतिव्याप्तिर्धूमाभावादेरप्ययोगोलकादौ गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वात् गोत्वाद्यभावस्य तत्प्रतियोगित्वञ्च धूमाद्यभावे जलवृत्तित्वविशिष्टगोत्वाभावो-नास्तीति प्रतीतिनियामकाभावस्याभावाधिकरणकाभावप्रतियोगिकाभावतया अधिकरणीभूतधूमाभावस्वरूपत्वात् जलवृत्तित्वविशिष्टगोत्वाभावस्य शुद्धविशिष्यानतिरिक्तत्वात् इत्याशङ्क्य जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तत्वाभावस्वरूपतां प्रदर्शयंस्तत्स्वरूपतां प्रतिक्षिपति, 'जलेत्यादि। न च धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहात् कथमतिव्याप्तिशङ्केति वाच्यम्। जलवृत्तित्वाविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्याप्युक्तयुक्त्या धूमाभावस्वरूपतासम्भवात् संयोगसम्बन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्त्वात्। न चैवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि तस्यैव प्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्ट्याक्रान्तत्वात् तस्य च धूमाभाववविशिष्टसकलवह्निमति वृत्तौ मानाभावान्नातिव्याप्तिप्रसक्तिः(१)।

(१) नातिव्याप्तिः प्रसज्यत इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदि च जलवृत्तित्ववैशिष्ट्यम् अन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभावत्वावच्छिन्न एव विशेषणं न त्वन्यतरत्वावच्छिन्नविशेषणतया प्रतियोगितावच्छेदकमिति जलवृत्तिद्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते, तदा तादृशाभावस्य विशिष्टाभावानात्मकतया अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणं यो धूमाद्यभावस्तदधिकरणकत्वानुपपत्तिरिति वाच्यम् । जलवृत्तिद्रव्यं धूमाभावविशिष्टयादृशहेत्वधिकरणे नियमतो वर्त्तते तादृशव्यभिचारिहेतुकस्थल एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादायातिव्याप्तिमाशङ्क्य 'जलवृत्तीत्यादिग्रन्थस्यावतारणीयत्वात् । न चैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचित इति 'विशिष्टगोत्वाभावस्याभाव-इति ग्रन्थासङ्गतिर्दुर्व्वारैवेति वाच्यम् । एतादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात् । न चैवमप्ययोगोलकभेदाभावस्यायोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूताविरहात् तस्य प्रतियोगिसामानाधिकरण्यं न घटत इत्यतिव्याप्त्यप्रसक्तिः साध्यतावच्छेदकसम्बन्धेन व्यापकताया लक्षणघटकत्वं प्रागेव दूषितमतो नायोगोलकभेदाद्यभावस्य लक्षणाघटकत्वसम्भव इति वाच्यम् । अयोगोलकभेदाभावादेरपि पूर्व्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसम्भवात् । अयोगोलकभिन्नभेदस्वरूपायोगोलकत्वनिरूपितायोगोलकभिन्ननिष्ठप्रतियोगितायास्तादात्म्यसम्बन्धेन साध्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यापकतायामवच्छेदकत्वं प्रतियोगितायाः प्रतियोगिस्वरूपतामते न सम्भवतीति अयोगोलकभिन्नात्मकतत्प्रतियोगिनस्तादात्म्येनायोगोलकेऽसत्त्वेऽपि नातिव्याप्त्युद्धारः एवञ्च धूमसाध्यकस्थले धूमसामान्याभावीयप्रतियोगितायां धूमसामान्यव्यापकतावच्छेदकत्वासम्भवेऽपि तत्तद्धूमव्यक्तिसाध्यकस्थले तादृशाभावस्य लक्षणघटकतया तदभिप्रायेणैव तस्य गोत्वाभावप्रतियोगित्वनिराकरणं तत्तद्धूमव्यक्तेरप्यनेकाधिकरणवृत्तितया नायोगोलकभिन्नस्य तादात्म्येन तत्साध्यव्यापकत्वमिति । न चैवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेऽपि पूर्व्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तितादवस्थ्यमिति वाच्यम्। तादृशप्रतियोगिना स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् घटत्वाभाववान् प्रमेयत्वादित्यादावपि घटत्वाभावादिप्रकारकप्रमाया अभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात्। न चैवं जलवृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाद्यभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्यसम्भवेन धूमादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्याभावात् धूमवान् वह्नेरित्यादावतिव्याप्त्यप्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपोऽयुक्त इति वाच्यम्। तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमादिप्रकारकप्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभाव-द्रव्यत्वप्रकारक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयैव समं विशिष्यतासम्बन्धेन ताद्दशाभावस्य सामानाधिकरण्यसत्त्वादतिव्याप्तिप्रसक्तेरिति। नन्वेवमपि धूमवान् वह्नेरित्यादावतिव्याप्तिर्दुर्वारैव धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात्। यदि च धूमत्वादिना प्रमेयं नास्तीत्यादिप्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहः न तु प्रमेयान्तरस्य, अथवा प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिता निवेशनीया यावत्प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वाद्यवच्छिन्नैव ताद्दशधर्म्मानवच्छिन्ना च धूमादिमात्रवृत्तिप्रतियोगितैव तदाश्रयसामानाधिकरण्यञ्च नायोगोलकाद्यन्तर्भावेनेति मन्यते, तथापि धूमाभावस्य वह्निधूमोभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभावप्रतियोगितया अयोगोलकान्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेनाकाशाभावस्यापि तत्प्रतियोगितया हेतुसमानाधिकरणधूमवत्त्वप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया द्रव्यत्वादिप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन धूमभेदस्य धूमत्व-समवेतोभयत्वावच्छिन्नाभावसमनियतत्वेन समवेतमात्रस्यैव तत्प्रतियोगितया हेतुसमानाधिकरणताद्दशाभावानां स्वविशिष्टयावद्वेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणि-दीधितिः ।

यत्सामानाधिकरण्यानां साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां याव-दभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-करण्यं तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादीना-मभावः सुलभ एव । शेषं दर्शितदिशावसेयमत आह, प्रतियोग्यवृत्तिश्चेति ।

गादाधरी-विवृतिः ।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रति-योगिता तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नाति-व्याप्तिरिति चेत्, तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रय-सामानाधिकरण्यं यत्र क्वचन यावदधिकरणान्तर्भावेन तत्त्वमित्ये-तावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्व-विशेषणस्य वैयर्थ्यप्रसङ्गः, एवं सर्व्वत्र हेतुसमानाधिकरण-सुभयत्वावच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वय-सम्भवाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षति-विरहेण एतादृशव्याप्तिलक्षणाशङ्कायां 'प्रतियोग्यवृत्तिश्चेत्यादिना तादृशाभावखण्डनस्यासङ्गत्यापत्तिः एवं जलवृत्तित्वविशिष्टगोत्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावाभावस्य जलत्वाभावस्वरूपतावत् धूमाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाभावस्वरूपतया व्यापकताघटकयावत्सम्बन्धेन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिश्च (१) इत्यतो लक्षणान्तरमाह, 'यत्समानाधिकरणानामिति, अत्रापि यत्तत्पदयोः पूर्ववत् यत्तद्धर्म्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः । अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः, तथाच धूमाद्यभावानां वह्नि-धूमोभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः, द्रव्यत्वेन धूमोनास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु धूमत्वादेरेव द्रव्यत्वादिस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासते इत्युपेयते अतस्तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-

(१) एवमित्यादिः अतिव्याप्तिश्चेत्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणविवक्षणेऽप्यतिव्याप्तेर्दुर्व्वारत्वेत्याशङ्कायाः नावकाशः। एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावस्तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तम्। वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्ट्यस्यैव प्रतियोगितावच्छेदकत्वावगाहनोपगमात् अन्यथा धूमवद्वृत्तिवह्निमति धूमशून्ये वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात्। अस्तु वा तादृशवैशिष्ट्यसहितस्य वह्नित्वस्य तथात्वं तावतापि न क्षतिः प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणपरत्वात्। अथैवमपि घटभिन्नत्वेन धूम-घटान्यतरन्नास्तीत्यत्र घट-धूमान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानं धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः। नापि घटभिन्नत्वसहितस्य तस्य गौरवात्, किन्तु घटभिन्नत्वमात्रस्यैव, एवञ्च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम्, एवं भेदत्वेनायोगोलकभेद-घटात्यन्ताभावान्यतराभावस्यायोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमप्ययोगोलकभेदाभावप्रतियोगितावच्छेदकम् (१) एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्व-धूमत्वान्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगिता-

---

(१) तादृशान्यतराभावस्य तादृशान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानम् अयोगोलकभेदशून्ये घटात्यन्ताभाववति अयोगोलके तादृशप्रतीत्यनुपपत्तिः, नाप्ययोगोलकभेदसहितस्य गौरवात् किन्तु भेदत्वमात्रस्यैवेति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकम्, एवम् इच्छान्यत्वेन इच्छायोगोलकाविषयकज्ञानान्यतराभावस्यायोगोलकाविषयकज्ञानाभावसमनियततया इच्छान्यत्वमपि तादृशज्ञानाभावप्रतियोगितावच्छेदकं तादृशधर्मावच्छिन्नज्ञानाद्यायोगोलकादावपि सत्त्वादतिव्याप्तिस्तदवस्थैवेति चेत्तर्हि, प्रतियोगितावच्छेदकेत्यनेन प्रतियोगिताया न्यूनवृत्तिभिन्नं सद्-यदवच्छेदकं तदेव विवक्षणीयं, न्यूनवृत्तित्वञ्च स्वसमानाधिकरण-भेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्वं, तद्भिन्नत्वञ्च व्यधिकरणधर्मसाधारणमपि, घट-धूमान्यतरादिनिष्ठप्रतियोगितायाश्च न्यूनवृत्त्येव घटभिन्नत्वादिकम्। न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन या वह्नित्वावच्छिन्नप्रतियोगिता प्रतीयते वह्निर्नास्तीत्यत्रापि वह्निवृत्तितया सैव प्रतियोगिता प्रतीयते, इत्युपेयते एकधर्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात्, तथाच कालिकादिसम्बन्धेन हेतुसमानाधिकरण-वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगिताया न्यूनवृत्तिभिन्नाव-च्छेदकाप्रसिद्ध्या अव्याप्तिरिति वाच्यम्। वह्नित्वेन प्रमेयं नास्तीति प्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगित्वं भासते नान्यस्ये-त्यभ्युपगमात् तादृशाभावप्रतियोगितायाः प्रमेयसामान्यवृत्तित्व-स्यैवासिद्धेः। अथवा प्रतियोगितावच्छेदकपदं प्रतियोगितायाः अनतिरिक्तवृत्ति सद्यदवच्छेदकं तत्परं अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कान्यत्व-तत्सामानाधिकरण्योभयाभाववत्त्वं (१) तथा-

(१) स्वम् अवच्छेदकत्वेनाभिमतं तथाच स्वव्यापकप्रतियोगिताकान्यत्व-प्रतियोगितासामानाधिकरण्योभयाभाववत्त्वमित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वञ्च व्यधिकरणधर्म्मसाधारणमपि, घट-धूमान्यतरादिनिष्ठप्रतियोगितयाश्चातिरिक्तवृत्त्येव घटभिन्नत्वादिकं, प्रतियोगितायाः यावद्घटभिन्नादिसाधारण्याप्रसक्तेः वह्नित्वाद्यवच्छिन्नप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वेऽपि तदनतिरिक्तवृत्त्यवच्छेदकं वह्नित्वादिकमेव स्वव्यापकतत्कान्यत्वस्यावृत्तौ प्रसिद्धत्वादिति नानुपपत्तिगन्धोऽपि। प्रतियोगितायाः स्वन्यूनवृत्तिभिन्नतत्कं सत् यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं विवक्षितं, न्यूनवृत्तित्वञ्च सामानाधिकरण्यघटितमिति व्यधिकरणधर्म्मसंग्रहः, तत्प्रतियोगितासमानाधिकरणतत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं यत् तदन्यप्रतियोगितावच्छेदकं वा निवेश्यम्। एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाभावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वधिकरणावच्छेदेन वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसम्भवेऽपि वह्नि-घटोभयत्वाद्यवच्छिन्नाभावस्यापि तथाविधतया तस्य च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेनासम्भव इत्यतोव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तम् अतएव व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्याप्रसिद्ध्या असम्भवः। अयमात्मा ज्ञानादित्यादौ केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थसङ्गतिः। न चायमात्मा ज्ञानादित्यादौ पूर्व्वक्षणवृत्तित्वविशिष्टात्मत्वत्वादेरात्मत्वादिव्यापकतावच्छेदकतया तद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छिन्नाभावस्योत्तरक्षणावच्छेदेन हेतुसमानाधिकरणतया इदं वाच्यं ज्ञेयत्वादित्यादावपि एतत्क्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्वत्वादेः(१) विषयतासम्बन्धेन जन्यज्ञानत्व-विश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादेश्च साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य तत्क्षणावच्छेदेन प्रलयाद्यवच्छेदेन च हेतुसमानाधिकरणतया च व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति वाच्यम्। प्रतियोगिवैयधिकरण्याघटितव्यापकताया एव निवेशनीयतया निरुक्तधर्म्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्म्माणां व्यापकतावच्छेदकत्वासम्भवात्। न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किन्न निवेश्यते प्रमेयसाध्यकस्थले संयोग-समवायादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम्। तथा सति लघुरूपसमनियतगुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः। अत्र च ज्ञानवानात्म-महाकालान्यतरत्वादित्यादौ अतिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन व्यापकत्वं तेनैव सम्बन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीयं, महाकालान्यत्वविशिष्टघटादि-

---

(१) पूर्व्वक्षणवृत्तित्वविशिष्टवाच्यत्वत्वादेः पूर्व्वक्षणवृत्तित्वविशिष्टवाच्यत्वत्वावच्छिन्नानधिकरणपूर्व्वक्षणावृत्तिपदार्थवन्निष्ठाभावप्रतियोगितावच्छेदकतया न व्यापकतावच्छेदकत्वम् अतएव तत्क्षणान्येति, तथाच क्षणिकपदार्थाप्रसिद्ध्या तदवच्छिन्नानधिकरणत्वं न कस्यचिदपीति न तदवच्छिन्नाभावस्य व्यापकत्वघटकतेति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यके कालत्वादेर्व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्यत्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्ट-सामानाधिकरण्याभावेनातिव्याप्त्यभावात्, तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले तादृशसम्बन्धेन साध्यं प्रति तादृशसम्बन्धेन व्यापकतायामवच्छेदकीभूतो यः प्रमेयत्वादिरूपकेवलान्वयिधर्म्मस्तद-वच्छिन्नस्य संयोग-समवाय-विषयितादिसम्बन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसम्भवात्, अभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात् तन्निवेशेऽपि व्यधिकरणसमवायित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकताकप्रमेय--त्वादिमद्भेदमादाय लक्षणसमन्वयसम्भवात् 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्यः' इति मिश्रोक्तेः तादृशभेदस्यापि सोन्दड़सम्मतत्वादिति केचित्, तदसत्, घटत्वाभाववान् प्रमेयत्वादित्यादौ पूर्व्वोक्तदिशा अतिव्याप्तेः। स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विशेषणमपि न सत्, तथा सति (१) इदं वाच्यं ज्ञेयत्वादित्यादौ (२) विषयिता-संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामञ्जस्यात् 'प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थासङ्गतेः। एतेन विषयतासम्बन्धेन व्यापकता तेन सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न-

(१) स्वप्रतियोगितावच्छेदकावच्छिन्नेत्यादिः तथा सतीत्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

(२) कथञ्चित् तद्ग्रावर्त्तनेऽपि इदं वाच्यं ज्ञेयत्वादित्यादाविति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामानाधिकरण्यं विवक्षणीयं, साध्यवत्त्वप्रकारकप्रमात्वाद्यवच्छिन्नाभावमादाय सर्वत्र लक्षणसङ्गमनमतिव्याप्तिनिरासश्चेत्यपि निरस्तं, 'ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ इत्यतादृश-ग्रन्थासङ्गतेश्च, ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासम्बन्धेना-व्यापकत्वात्, किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन व्यापकत्वं तेनैव च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विवक्षणीयं व्यभिचारिणि साध्याद्यभावस्य किञ्चिद्विशिष्टस्वाभावनिष्ठ-प्रतियोगितावच्छेदकविशेषणताविशेषेण तादृशाभावत्वरूपप्रतियो-गितावच्छेदकावच्छिन्नसामानाधिकरण्येऽपि तदवच्छिन्नभावसा-मानाधिकरण्यासम्भवान्नातिव्याप्तिः। किञ्चिद्विशिष्टस्य स्वस्य योऽभावः सामानाधिकरण्यसम्बन्धेन तद्विशिष्टस्याभावश्च विशिष्टस्वस-मनियतोऽपि स्वस्मादतिरिक्त एव अभावमात्रप्रतियोगिकाभावस्यैव तदभावप्रतियोगिरूपतायाः सिद्धान्तसिद्धत्वात्। अतो धूमाद्य-भावस्य सामानाधिकरण्यसम्बन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्य-भावाभावविशिष्टत्वावच्छिन्नाभावसामानाधिकरण्येऽपि न क्षतिः। वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणमुपेक्ष्य प्रति-योगितावच्छेदके अभावावृत्तित्वं निवेशनीयं तादृशाभावविशिष्ट-त्वञ्च (१) अभावसाधारणमिति न दोषः (२) यावदभावानामित्य-त्राप्यभावपदं भावभिन्नपरम्, अतः कालिकादिसम्बन्धेन हेतु-समानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकह्रदत्वाभावत्वाद्य-

(१) सामानाधिकरण्यसम्बन्धेन ह्रदवृत्तित्वविशिष्टधूमाभावविशिष्टत्वञ्चेत्यर्थः।

(२) धूमवान् वह्नेरित्यादौ नातिव्याप्तिरित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छिन्नप्रतियोगिताकस्य ऋतत्वादेः स्वप्रतियोगितावच्छेदकाव-च्छिन्नभावसामानाधिकरण्यासम्भवेऽपि न क्षतिः। न च ऋत-त्वाभावाभावस्य ऋतत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियत-तया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नाभाव-सामानाधिकरण्यमस्त्येवेति वाच्यम्। तस्य भावतया भिन्नत्वात्। एवं सति कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगाद्या-त्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीयस्वविशिष्टेत्यस्य सत्ता-वान् जातेरित्यादौ सार्थकता पूर्व्वोक्तदिशावसेया। न च भावभि-न्नाभावविवक्षणेऽपि अयमात्मा ज्ञानादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यव्यापकतावच्छेदकीभूतकालिकसम्ब-न्धावच्छिन्नप्रतियोगिताकाशाभावाभावत्वाद्यवच्छिन्नप्रतियोगिता-कस्याकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामा-नाधिकरण्यासम्भवाल्लक्षणसमन्वयासम्भव इति वाच्यम्। आकाशा-भावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेराकाशा-भावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्व-विरहेण तदवच्छिन्नाभावस्य लक्षणाघटकत्वात्। अस्तु वा व्यापक-तावच्छेदकरूपांश एव भाववृत्तित्वविशेषणं, इदं वाच्यं ज्ञेयत्वादि-त्यादौ च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्य-भावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसम्बन्ध-घटितव्यापकतावच्छेदकमतस्तादृशाभावस्य न लक्षणघटकतेति नोक्तप्रतियोग्यवृत्तित्वेत्यादिग्रन्थासङ्गतिरिति। न च प्रतियोगि-तावच्छेदकसम्बन्धेन व्यापकताविवक्षणेऽपि इदं वाच्यं ज्ञेयत्वादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यादौ विषयितादिसम्बन्धेन वाच्यत्वत्वादिमतो ज्ञानादेर्यः स्व-रूपसम्बन्धेनाभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्ध-घटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगि-ताकतया हेतुसामानाधिकरण्यतया स्वरूपसम्बन्धेन प्रतियोगिता-वच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधि-करणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्य-मिति तादृशग्रन्थासङ्गतितादवस्थ्यमिति वाच्यम्। धूमवान् वह्नेरित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिना समं संयोगेन, सम-वायसम्बन्धावच्छिन्नप्रतियोगिताकस्यायोगोलकावृत्तिजातित्वाद्य-वच्छिन्नाभावस्य कालिकसम्बन्धेन तादृशजातित्वादिविशिष्टस्या-योगोलकीयरूपादिना समं समवायेन, स्वरूपसम्बन्धावच्छिन्न-प्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालि-कसम्बन्धेन तादृशविषयत्वत्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगि-ताविशेषसम्बन्धेन तादृशविषयत्वत्वादिविशिष्टतादृशविषयत्वाद्यभा-वेन च समं स्वरूपसम्बन्धेन, विषयतासम्बन्धावच्छिन्नप्रतियोगिता-कधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासम्बन्धेन कालिकसम्ब-न्धेन वा तादृशप्रमात्वादिविशिष्टम् यदयोगोलकादिविषयकज्ञानं तेन समं विषयतासम्बन्धेन सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकत्वघटकसम्बन्धेनैव प्रतियोगितावच्छेदकवैशि-ष्ट्यस्य विवक्षणीयतया वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन द्रव्यत्वत्वादिमतः समवायादिसम्बन्धावच्छिन्नाभावस्य स्वप्रतियो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गितावच्छेदकसमवायादिसम्बन्धघटितद्रव्यत्वादिनिष्ठव्यापकतायाः स्वरूपादिसम्बन्धेन अवच्छेदकीभूतो यो द्रव्यत्वत्वादिस्तदवच्छिन्न-प्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकत्वघटकविषयितादिस-म्बन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना समं हेत्वधि-करणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न सम्भवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदक-ताघटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयत्वेन इदं वाच्यम् ज्ञेय-त्वादित्यादौ दर्शिताभावानां लक्षणघटकत्वाभावादिति दिक्।

नन्वत्र लक्षणे समवायित्वादिना वाच्यत्वाभावीयसमवायित्वादि-रूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वाद्-वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता तथाच तत्र तादृशभाव एव दुर्लभ इत्यत आह, 'ज्ञेयत्वत्वादिनेति, 'वाच्य-त्वादीनामित्यादिपदाद्घटादेरपि परिग्रहः, 'शेषमिति स्वविशिष्ट-यावद्धेत्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसा-मानाधिकरण्यविवक्षणं हेतुसामानाधिकरण्यादिशरीरे सम्बन्ध-विशेषनिवेशनं तत्प्रयोजनञ्चेत्यर्थः। अत्र च निरुक्ताभावेषु स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकाव-च्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवे-शयितुमुचितं सङ्केतौ व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेर्लक्षण-समन्वयसम्भवात् वह्निमान् धूमादित्यादौ कालिकादिसम्ब-न्धेन हेतुसमानाधिकरणस्य ह्रदान्यत्वप्रकारकप्रमाविषयत्वाद्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावस्य (१) दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशनेन वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसम्बन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि क्षतिविरहात्, कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादेरुक्तरीत्या व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्याभावेन भावभिन्नत्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः, धूमवान् वह्नेरित्यादौ च धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽपि अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाभावस्य भावप्रतियोगिकतया अयगोलकत्वाद्यतिरिक्तस्य प्रतियोग्यवृत्तित्वान्नातिव्याप्तिरित्यवधेयम् । नन्वयोगोलकान्यत्वप्रकारकप्रमाविशिष्यत्वाभावस्यायोगोलकावृत्तित्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन तादृशाभावप्रतियोग्ययोगोलावृत्तौ अयोगोलके अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वाभावसत्त्वादतिव्याप्तिरिति चेत्, न, हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकायोगोलकत्वप्रकारकप्रमाविषयत्वाभावत्वावच्छिन्नप्रतियोगिताकस्यायोगोलकत्वप्रकारकप्रमाविषयत्वस्वरूपाभावस्याभावमात्रवृत्तिप्रतियोगिताकत्वेन स्वसमनियतादपि भाववृत्तिप्रतियोगिताकत्वेन अतिरिक्तादयोगोलकावृत्तित्वावच्छिन्नाभावादतिरिक्तस्य यावदन्तर्गतस्य प्रतियोगिवृत्तित्वविरहेणातिव्याप्तिविरहात् । हेत्वधिकरणवृत्तित्वं प्रतियोगिवृत्ति-

(१) रूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्येति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वञ्च तादृशाभावत्वरूपेण बोध्यं, तेनाधिकरणस्वरूपाभावमादाय कुत्राप्यव्याप्त्यतिव्याप्तोर्नावकाशः। एवमयोगोलकभेदत्वेन प्रमेय-सामान्याभावीयप्रतियोगिताया यदि यावत्प्रमेयवृत्तित्वं विचारसहं तदा प्रतियोगितावच्छेदकसमानाधिकरणत्वमेव विवक्षणीयमित्य-वधेयम् (१)।

तत्त्वचिन्तामणि-दीधितिः।

केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य प्रतियोगिताया अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रति-योगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्य-तावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः। एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव साध्य-तावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदक-त्वस्यापि व्यभिचारत्वात्, अवच्छेदकत्वञ्चेह तत्पर्य्या-प्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्व-वह्नित्वो-भयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। सत्त्ववति गुणादौ संयोगाद्य-

---

(१) नन्वित्यादिः अवधेयमित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावोऽपि व्याप्यवृत्तिर्वच्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यं, भवति च गुणत्व-गुणावृत्तित्व-द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताक-व्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्यैव संयोगत्वमित्याहुः।

गादाधरी-विवृतिः।

चक्रवर्त्तिलक्षणमाह, 'केचित्त्विति, 'व्याप्यवृत्तेरिति, सद्धेतौ साध्यावृत्तिघटत्वादिना साध्याभाव एव लक्षणघटकस्तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् लक्षणसमन्वयः; व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वान्नातिव्याप्तिः। कपिसंयोगी तत्तद्वृक्षत्वादित्यादावव्याप्तेर्वारणाय 'व्याप्यवृत्तेरिति, व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं, न त्ववच्छिन्नवृत्तिकान्यत्वं, कपिसंयोगी सत्त्वादित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादेर्द्रव्येऽवच्छिन्नवृत्तिकतया तदन्यत्वाभावाद्घटत्वादिना साध्याभावस्यैव लक्षणघटकतया अतिव्याप्त्यापत्तेः। निरुक्तव्याप्यवृत्तित्वविशिष्टस्य च हेत्वधिकरणवृत्तित्वं बोध्यम्, अन्यथा कपिसंयोगी एतत्त्वादित्यत्र कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्य वृत्ते हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादायाव्याप्तेर्व्वारणासम्भवात् हेत्वधिकरणनिरूपितानवच्छिन्नाधेयतावत्त्वं हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणताकत्वं वा दलद्वयपर्य्यवसितार्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्येतिसमुदायस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः, हेत्वधिकरणे व्याप्यवृत्तित्वञ्च हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यन्निष्ठतद्व्यक्तित्वं तत्त्वम्। न च विशिष्टसत्तावान् जातेरित्यादौ गुणादिनिष्ठसत्तादिरूपाभावप्रतियोगितया विशिष्टसत्ताद्यभावनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वात् विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तित्वानुपपत्तिः यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमतस्तत्त्वमिति विवक्षणे व्यधिकरणधर्मावच्छिन्नाभावासंग्रहप्रसङ्गस्तदभावाप्रसिद्धेरिति वाच्यम्। यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतानवच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात्। गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययेन (१) विशिष्टसत्ताभावत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टायाश्च सत्ताया गुणादिवृत्तितानभ्युपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तित्वनिर्बाहादित्याहुः।

ननु संयोगिभिन्नं मेयत्वादित्यत्रातिव्याप्तिः संयोगिभेदाभावस्य

(१) अयं भावः वह्न्यादिसाध्यकसद्धेतौ घटत्वेन वह्न्यभावादिकमेव व्याप्यवृत्त्यभावः यतो यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकीभूतं यद्वह्नित्वावच्छिन्नप्रतियोगितानिरूपितवह्न्यभावनिष्ठानुयोगित्वं तन्निरूपकतावच्छेदकत्वस्य वह्नित्वादौ सत्त्वात्, तदवच्छेदकत्वं वह्न्यभावत्वादावक्षतं, विशिष्टसत्तावान् जातेरित्यादौ तु गुणादिनिष्ठसत्तात्वादिरूपाभावत्वस्य तादृशनिरूपकतानवच्छेदकत्वविरहेण विशिष्टसत्ताभावत्वस्यैव तादृशनिरूपकतानवच्छेदकतया तभादायैव लक्षणागमनसम्भवेन न काप्यनुपपत्तिरिति ध्येयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्याव्याप्यवृत्तित्वेन लक्षणघटकत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमनादिति चेन्न, संयोगिभेदस्य व्याप्यवृत्तित्वे तस्य द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततया तदभिन्नत्वेन तद्भेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपि संयोगिभेदाभावः तस्य हेत्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य च साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यनवकाशात्। एवं द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ व्याप्यवृत्तेः सत्तादिरूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्यव्याप्तिरित्यपि नाशङ्कनीयं, सत्तादिमत्त्वेऽपि द्रव्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीत्यादिप्रत्ययानुदयात् विशिष्टनिरूपिताधिकरणताविशेषस्यैव विशिष्टाभावाभावत्वोपगमात् तावतापि नाभावाभावस्य प्रतियोगिरूपताक्षतिर्विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावसमनियतत्वेन तदभिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात्।

परे तु संयोगत्वेन संयोगनिरूपिताया अधिकरणतायाः किञ्चिदवच्छिन्नत्वेऽपि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव द्रव्ये संयोगिभेदस्याप्रत्ययादवच्छेदकमनन्तर्भाव्यैव तदभावत्वावच्छिन्नवत्ताप्रतीतेः। एवं द्रव्यादौ सत्तात्वाद्यवच्छिन्नसत्ताद्यधिकरणतासत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्तात्वादिनैव तदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापि न वृत्तिः तत्र विशिष्टाभावो नास्तीत्यप्रत्ययात्, तथाच साध्यनिष्ठयादृशप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिताकाभावत्वावच्छिन्ननिरूपितानवच्छिन्नाधिकरणता हेत्व-धिकरणवृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छे-दके निवेश्यमिति न कश्चिद्दोष इत्याहुः।

अथ हेत्वधिकरणवृत्तित्वं यदि येन केनचित् सम्बन्धेन तदा कालिकादिसम्बन्धेन धूमाधिकरणे वर्त्तमानं वह्नित्वावच्छिन्न-वह्न्यभावादिकमादायाव्याप्तिः (१)। यदि च कालिकसम्बन्धेन काले वह्न्यभावादेर्वृत्तिर्वह्न्यनधिकरणदेशावच्छिन्नैवेति नासौ हेत्व-धिकरणे निरवच्छिन्नवृत्तिक इति मन्यते, तदापि सत्तावान् जातेरित्यादौ हेतुमति ज्ञानादौ विषयितासम्बन्धेन वर्त्तमानं साध्याभावमादायाव्याप्तिदुर्व्वारैव, दैशिकविशेषणतासम्बन्धेन हेत्व-धिकरणवृत्तित्वनिवेशने च घटत्वाभावादिसाध्यकव्यभिचारिण्यति-व्याप्तिः तत्र समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्य भाव-रूपसाध्याभावस्य तेन सम्बन्धेनावृत्तेर्व्यधिकरणधर्म्मावच्छिन्नाभाव-स्यैव लक्षणघटकत्वात्। एवं कालिकसम्बन्धवच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिर्दैशिकविशेषण-तया हेतुसमानाधिकरणस्याकाशाभावस्य प्रतियोगितावच्छेदक-तायाः साध्यतावच्छेदके सत्त्वात्, कालिकसम्बन्धेनाकाशाभावरू-पप्रतियोगिमत्ताया एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताक-आकाशाभावाभावो नास्तीति प्रत्ययनियामकत्वादाकाशाभावस्यैव तादृशसाध्याभावरूपत्वादिति चेन्न, स्वीययादृशप्रतियोगिताश्रय-वत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकज्ञानं विरोधि तादृश-

(१) न पुनरसम्भवः वाच्यं ज्ञेयत्वादित्यादावेव लक्षणगमनात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धेन हेत्वधिकरणवृत्तिर्योऽभावस्तदीयताट्टशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात्। आकाशाभावस्य दैशिकविशेषणतासम्बन्धश्च न दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयः अपि तु कालिकसम्बन्ध एव। न च तेन सम्बन्धेनाकाशाभाव आत्मनि वर्त्तते, अत आकाशाभावीयसाध्यनिष्ठप्रतियोगिताया याट्टशप्रतियोगितेत्यनेनोपादानासम्भवः, अपि तु व्यधिकरणधर्म्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव, ताट्टशाभावज्ञानस्य (१) दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्म्मप्रकारेण साध्यवत्त्वावगाहिनं भ्रमं प्रति विरोधित्वात्, सामान्यतश्च प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासम्बन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया उक्तदोषतादवस्थ्यमिति याट्टशप्रतियोगिताश्रयेत्युक्तं, प्रतियोगिताश्रयवत्ताज्ञानञ्च तत्प्रतियोगितावच्छेदकधर्म्मावच्छिन्नप्रकारकं ग्राह्यं (२) तेनाकाशत्वेन ताट्टशसाध्यवत्त्वज्ञानं प्रति दैशिकविशेषणतया आकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः। एवञ्च याट्टशप्रतियोगिताश्रयावगाहित्वनिवेशे प्रयोजनाभावात् याट्टशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रति प्रतिबन्धकमित्येव वक्तव्यं, साध्यवत्ताज्ञानविरोधित्वं वा एतल्लक्षणे निवेश्यं,(३), न च आकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यात्

---

(१) व्यधिकरणधर्म्मावच्छिन्नसाध्याभावज्ञानस्येत्यर्थः।

(२) तत्प्रतियोगितावच्छेदकधर्म्मप्रकारकमिति पा०।

(३) साध्यवत्ताज्ञानविरोधित्वमप्येतल्लक्षणे शक्यते निवेशयितुमिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधित्वपर्य्यन्तनिवेशे व्यधिकरणधर्म्मांद्यवच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्य व्यधिकरणधर्म्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानाविरोधितया तादृशसाध्याभावाप्रसिद्धेरिति वाच्यम्। घटत्वविशिष्टवह्निमदित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारकत्वस्याधिकन्त्वित्यादिन्यायेनाचतत्वात्। न च तन्मात्रावच्छिन्नप्रकारताकत्वमवश्यमेव निवेश्यं अन्यथा आकाशत्व-निरुक्तसाध्यतावच्छेदकोभयरूपेण साध्यवत्ताज्ञानं प्रति दैशिकविशेषणतया आकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यादिति कथं व्यधिकरणधर्म्मावच्छिन्नाभावसंग्रह इति वाच्यम्। प्रतियोगितावच्छेदकमात्राद्यवच्छिन्नप्रकारकत्वनिवेशेऽपि व्यधिकरणधर्म्मावच्छिन्नाभावासंग्रहात् तदवच्छिन्नप्रकारतामात्रनिवेशे उक्तस्थले आकाशाभावीयदैशिकविशेषणतावारणासम्भवात्, द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन सम्बन्धेन स्वप्रकारकज्ञानं विरोधीति विवक्षणवदेतल्लक्षणेऽपि साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधिताविवक्षणेन प्रतीकारसम्भवात् आकाशत्वादेस्तादृशाकाशाभावाभावत्वरूपसाध्यतावच्छेदकाद्यतिरिक्ततया तदवच्छिन्नप्रकारकज्ञानविरोधितामादाय न दोषः(१)। हेतुसमानाधिकरणस्य व्याप्यवृत्तेर्व्वह्नित्वादिना घटाद्यभावस्य

(१) दोषासम्भव इतीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेदकमतः 'साध्याभावस्येति । यद्यपि वह्नित्वेन घटाभावादेर्घटत्वेन वह्न्य-भावाद्यभिन्नतया तादृशाभावोऽपि साध्याभाव एव, तथापि प्रतियोगितावच्छेदकभेदेनाभावभेदमतेनेदं लक्षणं, समनियता-भावानामैक्याभिप्रायेणाग्रिमलक्षणम्, अथवा हेतुसमानाधिक-रणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशान्न दोषः वह्नित्वादिना घटाद्यभावस्य घटत्वादिना वह्न्याद्यभावाभिन्नत्वेऽपि तदीयघटादिनिष्ठप्रतियोगिताया एव व्यधिकरणवह्नित्वाद्यवच्छि-न्नत्वेन वह्न्यादिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात् प्रतियोगिता साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन निवेशनीया तेन सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नासम्भवः, व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वं व्यवस्थितमेव। प्रतियोगितावच्छेदकत्वञ्च साध्यतावच्छेदकताघटक-सम्बन्धावच्छिन्नं ग्राह्यं तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमाना-धिकरणस्य विषयितया गुणत्वादिमतः समवायेनाभावस्य या ज्ञानादिनिष्ठप्रतियोगिता तदवच्छेदकत्वेऽपि साध्यतावच्छेदकस्य न क्षतिः (१) सर्व्वत्र द्वित्वाद्यवच्छिन्नप्रतियोगिताकसाध्याभाव-

---

(१) नन्वत्रापि लघुरूपसमनियतगुरुधर्म्मावच्छिन्नसाध्यकव्यभिचारिणि अति-व्याप्तिवारणाय पारिभाषिकावच्छेदकत्वमेवानुसरणीयं तथाच वह्निमान् धूमादि-त्यादौ हेतुसमानाधिकरणस्येन्धनत्वेन वह्न्यभावस्य प्रतियोगितावच्छेदकं यदिन्धनत्वं तस्य वह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतया वह्नित्वस्यापि पारिभाषिकावच्छेदकत्वमित्यव्याप्तिरिति चेन्न, हेतुसमानाधिकरणाभावप्रति-योगितावच्छेदकं स्वसमानाधिकरणयद्धर्म्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मादायैवैतल्लक्षणसमन्वयसम्भवात् व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि क्षतिविरहेण व्यधिकरणधर्म्मावच्छिन्नाभावखण्डनं मूलकृतोऽकिञ्चित्करमतो लक्षणान्तरमाह, 'हेतुसमानाधिकरणस्येति, अत्र च (१) व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वे व्यधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादायाव्याप्तेर्व्वारणायोपात्तस्य सामानाधिकरण्येनेत्यस्य वैयर्थ्यात् लक्षणासामञ्जस्यमिति तादृशाभावखण्डनं सङ्गच्छते (२) अत्रापि 'हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यस्य पूर्व्वोक्त एव पर्य्यवसितार्थः, व्यावृत्त्यादिकमपि पूर्व्वोक्तमेव। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाशाभावाभाववान् आत्मत्वादित्यादावव्याप्तेर्व्वारणाय पूर्व्वोक्तरीत्यनुसरणे गौरवाद्व्याप्यवृत्तित्वं परित्यज्य प्रतियोगिव्यधिकरणत्वेनाभावं विशेषयति, 'प्रतियोगिव्यधिकरणस्येति, पूर्व्वलक्षणे साध्याभावस्य विशिष्योपादानात् तस्य च हेत्वधिकरणे साध्यरूपप्रतियोगिना सामानाधिकरण्यमावश्यक-

---

नवच्छेदकं तत्त्वमित्यस्य विवक्षितत्वात् तथाच वह्नित्वस्य इन्धनत्वसामानाधिकरण्याभावात् नोक्तदोष इति ध्येयम्।

(१) व्यधिकरणधर्म्मावच्छिन्नाभावविनिर्मोकेण सर्व्वत्र लक्षणसमन्वयेऽपि न मूलकृतस्तादृशाभावखण्डनम् अकिञ्चित्करं व्यधिकरणधर्म्मावच्छिन्नाभावासत्त्वे वह्नित्वादिना व्यधिकरणधर्म्मेण घटाद्यभावमादायाव्याप्तिकारकसाध्यघटितलक्षणस्य व्यर्थविशेषणघटितत्वेन दुष्टत्वादित्यवधेयम्।

(२) अत्रेदं बोध्यं पूर्व्वलक्षणे समनियताभावैक्ये वह्नित्वेन घटाभावप्रतियोगितावच्छेदकत्वमादायाव्याप्तिवारणायोक्तसाध्यनिष्ठप्रतियोगितेत्यस्य वैयर्थ्यात् लक्षणासामञ्जस्यमिति तादृशाभावखण्डनं निराबाधमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेवैकव्यक्तिवृत्तिसाध्यके (१) अतस्तत्र प्रतियोगिव्यधिकरणसाध्या-भावाप्रसिद्ध्या अव्याप्तिरिति तन्नोक्तम् । प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वं, संयोगि सत्त्वादित्यादौ संयोगाद्य-भावस्यातथात्वादभावान्तरमादायातिव्याप्तिः किन्तु प्रतियोग्यनधि-करणवृत्तित्वम्, एवञ्च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्ते-रिति दलद्वयपर्य्यवसितार्थः, प्रतियोग्यनधिकरणत्वञ्च साध्यताव-च्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नत्वम्, अतः समवायादिना ज्ञानादिसाध्यक-द्रव्यत्वादिहेतौ नातिव्याप्तिः, इत्यञ्च प्रतियोगिता न सम्बन्धविशेषावच्छिन्नत्वेन विशेषणीया विशेषणताविशेषेण अभावसाध्यके सर्व्वस्यैवाभावस्य तेन सम्बन्धेन किञ्चिद्विशिष्ट-स्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणा-भावाप्रसिद्धिरतो यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमत-स्तादृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यता-वच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सिद्धान्तलक्षणवक्ष्य-माणरीत्या निष्कर्षणीयम्। अथ विशिष्टसत्तावान् जातेरित्यत्राति-व्याप्तेर्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वाच्यतया वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगितायाः लक्षणघटकत्वासम्भवस्तदवच्छेदक-वह्नित्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात् तथाच सामा-नाधिकरण्येनेत्यनर्थकम् ।

अत्र केचित् यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रति-

(१) तत्तद्घटवृत्तिरूपवान् तत्तद्रसादित्यादावित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्याय विवक्षणीयं दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात् उभयानधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारकतया सामानाधिकरण्येनेत्यस्य सार्थकता। न च वह्नित्वेन घटाद्यभावस्य प्रतियोगिता यावद्वह्निभिन्नवृत्तिरेकैव (१) स्वीक्रियते न तु घट-पटादिरूपप्रतियोगिभेदेन भिन्ना अभावस्य प्रतियोगितावच्छेदकस्य चैक्यात् तथाच घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वं न तत्रेति न सामानाधिकरण्येनेत्यस्य सार्थकतासम्भवः प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीयवह्न्यादिनिष्ठाया वह्न्यादिसामान्याभावीयप्रतियोगितायाः पर्व्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्व्वतादौ सत्त्वात् वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरिति वाच्यम्। यतः प्रतियोगिभेदेन न प्रतियोगिताभेदः, अपि त्ववच्छेदकभेदेनैव, एवमपि वह्निभिन्नवान् घटादित्यादौ वह्निभिन्नत्वेन वह्न्यभावीयप्रतियोगिताया वह्निभिन्ने असम्भाविततया तदाश्रयानधिकरणत्वस्य वह्निशून्ये हेतुमत्यक्षततया तादृशप्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्वारकतया सामानाधिकरण्येनेत्यस्य सार्थक्यं, महाकालो घटवान् कालपरिमाणादित्यादौ तु महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितैव तादृशी महा-

(१) यावदिति वह्निभिन्नविशेषणम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालस्य तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशून्यत्वात्। अथवा (१) वक्ष्यमाणरीत्या साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व-यादृशप्रतियोगिताश्रयप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रित्वावच्छिन्नाभावस्तदनवच्छेदकत्वमेव वाच्यं, एवञ्च तत्रावृत्तिगगनाद्यभावप्रतियोगितैव तादृशी, एवञ्च वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदकवह्नित्वविशिष्टप्रतियोगिकत्व-तदाश्रयवह्निभिन्नप्रतियोगिकत्वयोरेकस्मिन् सम्बन्धे असत्त्वेन तादृशप्रतियोगिताया अपि तथात्वात् तद्वारकतयापि सामानाधिकरण्येनेत्यस्य सफलत्वमवधेयमित्याहुः।

परे तु अत्यन्ताभावस्येवान्योन्याभावस्यापि प्रतियोग्यवृत्तिधर्म्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्व्वतादौ वह्नित्वविशिष्टाद्यवच्छिन्नजलादिमद्भेदोऽपि प्रामाणिकः एवञ्च स्वावच्छेदकविशिष्टावच्छिन्नस्वाश्रयवन्निष्ठप्रतियोगिताकभेदवद्धेत्वधिकरणकं यत्प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेदकस्य निवेशनीयम्। एवञ्च वह्नित्वादिना जलाद्यभावीयप्रतियोगितापि तादृशं स्वं कथितभेदस्य (२) तदवच्छेदक (३) वह्नित्वादिविशिष्टावच्छिन्नतदाश्रयजलादिमन्निष्ठप्रतियोगिताकत्वात् अतस्तदवच्छेदकत्वमा-

---

(१) यदि च महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाधिकरणता महाकाले वर्त्तते तदाह, अथवेति।

(२) वह्निमत्त्वादिना जलादिमद्भेदस्येत्यर्थः।

(३) वह्नित्वादिना जलाद्यभावीयप्रतियोगितावच्छेदकेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दाय दोषवारणाय 'सामानाधिकरण्येनेति, संयोगि द्रव्यत्वात् वह्निमान् धूमादित्यादौ संयोगत्व-वह्नित्वाद्यच्छिन्नसंयोग-वह्न्या-द्यभावप्रतियोगितायाः गुणत्व-ह्रदत्वाद्यवच्छिन्नसंयोगि-पर्व्वतादि-भेदं (१) संयोग-वह्न्याद्यवच्छिन्नगुण-ह्रदादिभेदं (२) चादाय तथा-त्ववारणाय (३) अवच्छिन्नान्त-निष्ठान्तयोरुपादानम्। अथवा (४) यादृशप्रतियोगितावच्छेदकावच्छिन्नयादृशप्रतियोगिताश्रयवृत्ति(५) प्रतियोगितावच्छेदकताकभेदवत्त्वं हेतुमतस्तादृशप्रतियोगितान-वच्छेदकत्वं विवक्षणीयं वह्नित्वादिना घटाद्यभावप्रतियोगिताप्ये-तादृशी तादृशप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नतादृशप्रतियोगि-तासमानाधिकरणप्रतियोगितावच्छेदकताकस्य वह्नित्वेन घट-वान्नेति प्रतीतिविषयभेदस्य हेतुमति सत्त्वात् व्यधिकरणधर्म्म-स्यात्यन्ताभावप्रतियोगितावच्छेदकत्ववदन्योन्याभावप्रतियोगिताव-च्छेदकतायामप्यवच्छेदकत्वादतएव 'समवायितया वाच्यत्ववद्भेदो-ऽपि द्रष्टव्यः' इति मिश्रैरभिहितम्,' इत्यत्र तादृशप्रतियोगि-तावारणाय 'सामानाधिकरण्येनेति, हेतुमतो वह्नित्वेन घट-वद्भेदवत्त्वं घटत्वेन वह्निमद्भेदवत्त्वञ्चादाय वह्नित्वाद्यवच्छिन्न-

---

(१) गुणत्वाद्यवच्छिन्नसंयोगिभेदं ह्रदत्वाद्यवच्छिन्नपर्व्वतादिभेदमित्यर्थः।

(२) संयोगाद्यवच्छिन्नगुणादिभेदं वह्न्याद्यवच्छिन्नह्रदादिभेदमित्यर्थः।

(३) स्वाश्रयवन्निष्ठप्रतियोगिताकभेदवद्वृत्त्यधिकरणकत्व स्वावच्छेदकविशिष्टा-वच्छिन्नप्रतियोगिताकभेदवद्वृत्त्यधिकरणकत्वयोश्च वारणायेत्यर्थः।

(४) व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकभेदानभ्युपगमे त्वाह, अथवेति, व्यधिकरणधर्म्मावच्छिन्नावच्छेदकताकभेदस्य मिश्रादिभिः स्वीकृतत्वादिति भावः।

(५) प्रतियोगिताश्रयवृत्तित्वं प्रतियोगितावच्छेदकताया विशेषणम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वह्निनिष्ठप्रतियोगितायाः तादृशत्ववारणाय प्रकृतप्रतियोगितासमानाधिकरणत्व-तदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छेदकतायां निवेशनं, महाकालो घटवान् कालपरिमाणात् इत्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितामादायैव लक्षणसमन्वयः न तु गगनत्व पटत्वादिना घटाद्यभावीयप्रतियोगितां, तस्या गगनाद्यवच्छिन्न-घटाद्यवच्छिन्नकालभेदं गगनत्व-पटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदञ्चादाय पूर्व्वप्रतीकाल्लाभसम्भवेऽपि (१) सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः। अथवा तादृशप्रतियोगितासामान्ये यद्धर्म्मसामानाधिकरण्यविशिष्टयद्धर्म्मावच्छेद्यत्वाभावः यद्धर्म्मसामानाधिकरण्य-यद्धर्म्मावच्छेद्यत्वोभयाभावो वा तद्धर्म्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव विवक्षणीयम्, एवञ्च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगितामादायापि लक्षणसमन्वयस्तत्र सम्भवतीति ध्येयम्। वह्नित्वेन वह्नि-धूमोभयं नास्तीत्येतादृशप्रतीतिविषयाभावस्य वह्निमान् वह्नित्वेन वह्नि-धूमोभयवान् नेति प्रतीतिसिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेऽपि तस्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्य्याप्तं तथा सति वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमति तादृशाभावप्रत्ययाप्रसङ्गात्(२) किन्तु वह्नित्वसहिततदुभयत्व एव तत्पर्य्याप्तिरतस्तादृशप्रतियोगितायाः समानाधिकरणतया तदवच्छेदकत्वे-

---

(१) गगनत्व-पटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदञ्चादायानवच्छेदकपूर्व्वप्रतीकार्थलाभसम्भवेऽपीति, भेदञ्चादायानच्छेदकसम्भवेऽपीति च पा०।

(२) तादृशाभावाप्रत्ययप्रसङ्गादिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽपि वह्नित्वस्य न क्षतिः। यदि च तादृशाभावप्रतियोगितावच्छेदकं वह्नित्वादिकमेव न तु प्रतियोगिविशेषणतापन्नमुभयत्वं, प्रतियोगिविशेषणतानापन्ने प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्विशेषणतापन्ने तदनवगाहनात् अन्यथा वह्नित्वेन घटो नास्तीत्यादावपि घटत्व-वह्नित्वाद्युभयस्मिन्नवच्छेदकत्वपर्य्याप्त्यवगाहनौचित्यात् सामानाधिकरण्येनेत्यस्य वैयर्थ्यापत्तेः, वह्नित्वेनोभयाभावप्रतियोगिता च व्यासज्यवृत्तिरतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरथवा सोन्दड़मते प्रतियोगितावच्छेदकधर्म्मावच्छिन्नस्यैव तद्धर्म्मावच्छिन्नप्रतियोगिनोऽपि नाभावविरोधित्वं किन्तु अभावबुद्धौ प्रतियोग्यंशे प्रकारीभूतो यो धर्म्मस्तद्विशिष्टप्रतियोगितावच्छेदकावच्छिन्नस्यैवेति न केवलान्वयित्वानुपपत्तिरिति मन्यते, तदा सामानाधिकरण्येनेत्यस्य प्रतियोगितापर्य्याप्त्यधिकरणवृत्तित्वेन, प्रतियोग्यंशे प्रकारीभूतधर्म्मपर्य्याप्त्यधिकरणवृत्तित्वेन वा इत्येवार्थः इत्याहुः। तदुभयमपि न युक्तम्, एवं सति घटत्वादिना साध्याभावप्रतियोगितायामपि निरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसम्भवेन प्रथमलक्षणे प्रतियोगिव्यधिकरणस्येत्यनभिधानस्य निर्बीजतया सन्दर्भविरोधापत्तेः। वस्तुतो यादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारकतावच्छेदकयत्किञ्चिद्धर्म्मावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वं साध्यतावच्छेदकस्य विवक्षणीयं कपिसंयोगत्वावच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारताच्छेदकं कपिसंयोगत्वादिकमेव तदवच्छिन्नानधिकरणत्वञ्च न हेतुमत इति न कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन च प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेयं नास्तीत्यादिज्ञाने भानात् प्रमेयत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसम्भवात् घटत्वाद्यवच्छिन्नप्रतियोगिताया यादृशप्रतियोगितेत्यनेन उपादानासम्भवात् तथाविधप्रतियोगिताया अप्रसिद्धिरतो यत्किञ्चिदित्युक्तं, दण्डिमान् दण्डसंयोगादित्यादौ तत्तद्दण्डावच्छिन्नानधिकरणत्वमादाय दण्डसामान्याभावस्य प्रतियोगिवैयधिकरण्येऽपि न क्षतिः तत्तद्दण्डावच्छिन्नात्यन्ताभावप्रतियोगितावच्छेदकत्वमादाय दोषवारणाय तत्र परम्परासम्बन्धेन दण्डत्वादेः साध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वात्, तत्संयोगत्व तद्वह्नित्वादिविशिष्टप्रतियोगिविषयकाभावभाने संयोगत्व-वह्नित्वादिरूपसामान्यधर्म्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने मानाभावात् तत्संयोगत्व-तद्वह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः, वह्नित्वावच्छिन्नप्रतियोगिताया घटत्वाद्यवच्छिन्नत्वेन घटो नास्तीत्यभावबुद्धौ संसर्गतया भानोपगमे भ्रमानिरूपितत्वेन प्रकारता विशेषणीया, विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वान्नातिव्याप्तिः वह्नित्वाद्यवच्छिन्नघटत्वादिनिष्ठव्यधिकरणधर्म्मावच्छिन्नाभावीयप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वात् सामानाधिकरण्येनेत्यस्य सार्थकता, एकवृत्तिसाध्यकस्थले (१)

---

(१) अनेकव्यक्तिवृत्तिसाध्यकस्थले तु तत्तद्व्यक्तिवृत्तिसाध्याभावीयप्रतियोगिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नान-धिकरणत्वं न हेतुमत इति साध्यवृत्तितथाविधप्रतियोगितायाअप्रसिद्धया न पूर्व्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वं निवेशितम्। वह्नित्वादिना उभयाभावमादाय दोषस्तु पूर्व्ववदेव वारणीय इति।

परे तु (१) यदि च घटत्वेन वह्निर्नास्ति वह्नित्वेन घटो-नास्तीत्यादौ वह्नित्व-घटत्वादिरूपसमानाधिकरणधर्म्मस्यापि प्रति-योगितावच्छेदकत्वं भासते, अन्यथा तादृशप्रतीतौ प्रतियोगिनि तद्धर्म्माणामुपलक्षणतया भानेन तद्विशिष्टवैशिष्ट्यानवगाहितया तन्निर्व्विकल्पकानन्तरमप्युत्पत्त्यापत्तेः। न च वह्नित्व-घटत्वादेः प्रति-योगितावच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तरं तादृशाभाव-बुद्धिरिष्टैव प्रतियोगितावच्छेदकतया यद्भासते तन्निर्व्विकानन्तर-मेवाभावप्रतीत्यनुपगमात् इति वाच्यम्। वह्नित्वादिनिर्व्विकल्प-कानन्तरं तथाविधप्रत्ययोपगमे विशेषाभावेन तदुत्तरम् उप-लक्षणविधया वह्नित्वाद्यवगाहिनो वह्निर्नास्तीत्याकारकसमाना-धिकरणधर्म्मावच्छिन्नाभावप्रत्ययस्यापि (२) स्वीकारापत्तेः एवं स्वातन्त्र्येण प्रतियोगितावच्छेदकत्वविषयकाभावबुद्धौ प्रतियोगिनि प्रकारस्योपलक्षणतया भानोपगमे वह्निमति वह्नित्वेन द्रव्यं नास्तीतिप्रतीत्यापत्तिः। यत्तु प्रतियोगिप्रकारविरुद्धधर्म्म एव

सम्बन्धावच्छिन्नप्रकारतावच्छेदकतत्तद्व्यक्तिवृत्तिसाध्यमात्रवृत्तिधर्म्मावच्छिन्नानधिक-रणत्वं हेतुमति सत्त्वात् तादृशप्रसिद्धया तत्र न दोषसम्भव इत्येकमात्रवृत्तीति।

(१) अन्ये त्विति पा०।

(२) तदुत्तरं वह्नित्वाद्यंशे प्रतियोगितावच्छेदकत्वानवगाहिवह्निर्नास्तीत्या-कारकसमानाधिकरणधर्म्मावच्छिन्नाभावप्रत्ययस्यापीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वातन्त्र्येण प्रतियोगितावच्छेदकत्वं भासते इति नियमान्न तदापत्तिरिति, तन्न, तथा सति ह्रदादौ वह्नित्वेन किमपि द्रव्यं नास्तीति प्रतीत्यनुपपत्तेः। न च प्रतियोगित्वे प्रतीतिप्रकारीभूतधर्म्मान्यूनवृत्तित्वभाननियमात् पर्व्वतादिवृत्तिवह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताया द्रव्यत्वन्यूनवृत्तित्वान्नोक्तापत्तिरिति वाच्यम्। वह्नित्वेन द्रव्यं नास्तीति शब्दजबोधे प्रतियोगिताया द्रव्यत्वान्यूनवृत्तित्वभासकाभावात्। न च संसर्गतया भासमाने वह्नित्वावच्छिन्नप्रतियोगित्वे द्रव्यत्वान्यूनवृत्तित्वस्य संसर्गतावच्छेदकतया भानमाकाङ्क्षाबलादेव सम्भवतीति वाच्यम्। अन्यूनवृत्तित्वस्य नानापदार्थघटितस्य संसर्गघटकतया भाने मानान्तरविरहेण स्वरूपसम्बन्धावच्छिन्नत्वभानोपगमस्यैवोचितत्वात् (१)। इत्युच्यते, तदा व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकत्वमादायासम्भवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार। तदर्थश्च प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा सत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येनेत्यस्य सार्थक्यसम्भवात्। न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताच्छेदकताकभेदवत्त्वं तथाच संयोगत्वावच्छिन्नघटादिमद्भेदमादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिः भेदप्रतियोगितावच्छेदकतायां प्रकृत-

(१) एवमित्यादिः उचितत्वादित्यन्तः पाठः केषु चिदादर्शपुस्तकेषु नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगितासामानाधिकरण्यनिवेशनेन सामञ्जस्यात्। न च (१) परे त्वित्यादिनाभिहितद्वितीयकल्प एव पर्य्यवसानमिति घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नवह्निमद्भेदमादाय प्रतियोगिवैयधिकरण्यापत्त्या वह्नित्वादेस्तत्प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकतया अव्याप्तिरिति वाच्यम्। व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकवच्छेदकताकभेदानभ्युपगमेनैवोक्तापत्त्यसम्भवात्, घटत्वेन पटवान्नेत्यादौ घटत्वाद्यवच्छिन्नपटात्यन्ताभावस्यैव विषयत्वोपगमात्, प्रतियोगितावच्छेदकं सामानाधिकरण्येन यत्रावच्छेदकं तादृशप्रतियोगितावच्छेदकताक एव वा भेदो निवेश्यः(२)। अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वाद्यवच्छिन्नघटादिमद्भेदमादाय घटत्वाद्यवच्छिन्नघटादिदिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्दुर्व्वारैवेति चेन्न, सामानाधिकरण्येन प्रतियोगिताया अवच्छेदकं यद्यत् तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात्। अथ वह्नित्वादिना

(१) सामञ्जस्यादित्यनन्तरं "न च घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नवह्न्यादिमद्भेदमादाय प्रतियोगिवैयधिकरण्यं दुर्व्वारं तादृशभेदीयवह्न्यादिनिष्ठप्रतियोगितावच्छेदकतायां घटत्वाद्यवच्छिन्नवह्न्यभावीयवह्न्यादिनिष्ठप्रतियोगिताव्यधिकरणघटत्वादेरिव तत्समानाधिकरणवह्नित्वादेरपि सामानाधिकरण्येनावच्छेदकतायास्तादृशात्यन्ताभावप्रतियोगितावच्छेदकतावदप्रत्याख्येयत्वात्, प्रकृतप्रतियोगितासमानाधिकरणधर्म्मावच्छिन्नत्वस्य भेदवारणासम्भवादिति वह्नित्वादेस्तत्प्रतियोगितायां सामानाधिकरण्येनावच्छेदकतया अव्याप्तिरिति वाच्यम्।" इत्यधिकः पाठः कुत्रचिदादर्शपुस्तके वर्त्तते।

(२) प्रतियोगितावच्छेदकसमानाधिकरण्येन यावच्छेदकता तादृशावच्छेदकताकप्रतियोगिताकभेद एव वा निवेश्य इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटाद्यभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकं तदा घटादिमति तादृशाभावासत्त्वप्रसङ्ग इति वह्नित्व-घटत्वाद्योरेवावच्छेदकतापर्य्याप्तिरुपगन्तव्या तथाचानवच्छेदकपदस्यावच्छेदकतापर्य्याप्त्यनधिकरणपरतया व्याख्येयतयैव तादृशाभावप्रतियोगितामादाय दोषाप्रसक्तेः सामानाधिकरण्येनेत्यस्य वैयर्थ्यमशक्यवारणमेवेति चेन्न, प्रतियोगिविशेषणतापन्न-तदनापन्नयोरवच्छेदकतावैलक्षण्येन प्रत्येकमेवावच्छेदकतापर्य्याप्तेः पर्य्याप्तिविवक्षामात्रेण प्रतीकारासम्भवात् सामानाधिकरण्येनेत्यस्य सार्थक्यात् तदपि प्रतियोगिविशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्य्याप्त्यनधिकरणत्वलाभायैव, एवञ्च विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्य्याप्तयोरवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकत्वत्वेनानुगतयोः समानाधिकरण-व्यधिकरणधर्म्मद्वये पर्य्याप्त्यन्तरं स्वीक्रियते तादृशानुगतरूपावच्छिन्नपर्य्याप्त्यधिकरण-धर्म्मावच्छिन्नस्यैवाभावविरोधितेति(१) व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगिमति सत्त्वोपपत्तिः। एवञ्च ह्रदत्व-वह्नित्वोभयावच्छिन्नवह्न्यभावमादाय पर्य्याप्तिनिवेशव्यावृत्तिप्रदर्शनं समानाधिकरणधर्म्मस्य व्यधिकरणधर्म्मावच्छिन्न-

---

(१) कुत्रचिदादर्शपुस्तके लक्षणाभिप्रायेणेतीत्यनन्तरम् अधिकपाठो वर्त्तते यथा, व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात्, अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्य्याप्तयोरप्यवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकतात्वेनानुगतयोः समानाधिकरण-व्यधिकरणधर्म्मद्वये पर्य्याप्त्यन्तरं तादृशानुगतरूपावच्छिन्नपर्य्याप्त्यधिकरणधर्म्मावच्छिन्नस्यैव वाभावविरोधितेति नानुपपत्तिरिति वदन्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगितानवच्छेदकत्वपत्तीयव्याप्यवृत्तित्वघटितलक्षणाभिप्राये-णेत्याहुः।

'अव्यभिचारिसम्बन्धरूपता' अवयवशक्त्या अव्यभिचारिसम्बन्धपदप्रतिपाद्यता, तथाच पूर्व्ववन्न तत्पदस्य पारिभाषिकतेति भावः। ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारपदार्थस्य तच्छरीरेऽनिवेशात् कथमेवमित्यत-आह, 'हेताविति हेत्वन्वयि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं यथा व्यभिचारः तथा साध्यतावच्छेदकान्वयिनो हेतु-समानाधिकरणाभावप्रतियोगितायां सामानाधिकरण्येनावच्छेदकत्वस्यापि तथात्वादित्यर्थः, वह्निर्धूमस्य व्यभिचारीत्यत्राभाव-वद्वृत्तित्वं व्यभिचारपदार्थः, तदेकदेशे चाभावे षष्ठ्यर्थप्रतियोगि-ताया निरूपकत्वसम्बन्धेनान्वयः, प्रतियोगितायां चाधेयतासम्बन्धेन धूमस्य, अवच्छिन्नत्वसम्बन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः, साध्यतावच्छेदकावच्छिन्न-साध्यान्तर्भावेण च न व्यभिचारपदार्थता शक्त्यानन्त्यप्रसङ्गात् साध्य-वाचकपदवैयर्थ्यापाताच्च। एवं समानाधिकरणाभावप्रतियोगि-तायां सामानाधिकरण्येनावच्छेदकत्वं व्यभिचारपदार्थः, सामाना-धिकरण्ये च व्युत्पत्तिवैचित्र्यात् प्रथमान्तपदोपस्थाप्यस्यापि वह्नेर्निरूपकत्वेनान्वयः, वह्न्याद्यन्तर्भावेनैव वा शक्तिः, धूमपदं लक्षणया धूमत्वपरम्, आधेयत्वं षष्ठ्यर्थः, अन्वयश्चास्यावच्छेदकत्वे, निरूपकत्व-मिन्प्रत्ययार्थः, तथाच धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगि-तावच्छेदकतानिरूपको वह्निरित्यन्वयबोधः। यद्यपि लाघवरूप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विनिगमकसत्त्वादभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पन-मुचितं, तथापि ज्ञेयत्वं वाच्यत्वस्याव्यभिचारीति प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकं; तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासम्भवात्, उक्तरूपस्य व्यभिचारपदार्थत्वे च व्यभिचारस्याभावोऽव्यभिचार-मित्यव्ययीभावाश्रयणात् ज्ञेयत्वसमानाधिकरणाभावप्रतियोगिता-नवच्छेदकत्वमव्यभिचारपदार्थः, इन्प्रत्ययार्थः निरूपकत्वं, वाच्य-त्वपदं वाच्यत्वत्वपरं, षष्ठ्यर्थश्चाधेयत्वं, तथाच वाच्यत्वत्वनिष्ठस्व-समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वनिरूपकं (१) ज्ञेय-त्वमित्यन्वयबोधः। अथैवमपि अव्यभिचारिसम्बन्धपदेनोक्तव्याप्तेः कथं लाभः। न चाव्यभिचारिपदं तादृशप्रतियोगितानवच्छेदक-त्वाश्रयपरं, सम्बन्धश्च तदाश्रयसामानाधिकरण्यमिति तल्लाभ-इति वाच्यम्। धूमाव्यभिचारिवह्नित्वमितिप्रयोगाभावादुक्तधर्म्म-बोधकाव्यभिचारपदसमभिव्याहृतमत्वर्थीयस्याश्रयत्वाबोधकत्वाद-व्यभिचारपदार्थान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकर-णाभावप्रतियोगितानवच्छेदकताबोधकताया व्युत्पत्तिसिद्धत्वात्, साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वे हेतुसमानाधिकरणेत्यादि-व्याप्तिबोधस्याशक्यत्वाच्चेति चेन्न, अव्यभिचारिसम्बन्ध इत्यस्याव्यभि-चारिहेतुनिष्ठं साध्यसामानाधिकरण्यमित्यर्थः, एवञ्च साध्यताव-च्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकताकहेतु-निष्ठसाध्यसामानाधिकरण्यमिति पर्य्यवसितं, उक्तलक्षणवाक्य-

---

(१) स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकताकमिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्याप्यत्रैवार्थे तात्पर्य्यं न तु यथाश्रुतविशेष्य-विशेषणभावे, तदापन्न-स्याव्यभिचारिसम्बन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया-दुर्व्वारत्वात्। न च यद्रूपावच्छिन्नस्य यस्य व्याप्तित्वं तदन्यरूपेण तस्याव्यभिचारिसम्बन्धपदार्थत्वेऽपि न क्षतिरिति वाच्यम्। एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वेऽपि व्यतिरेकिसाध्यकोक्तव्याप्तेरव्यभिचारिसम्बन्धरूपतोपपत्तेरुक्तधर्म्मस्य व्यभिचारपदार्थत्वव्यवस्थापनाया अनुपयुक्तत्वात्। उक्तलक्षणेऽपि साध्यसामानाधिकरण्यमन्तर्भाव्याव्यभिचारिसम्बन्धरूपताया व्यवस्थापयितुं शक्यत्वात् साध्यसामानाधिकरण्यानन्तर्भावेऽपि प्रतियोगिसमानाधिकरणस्वसमानाधिकरणनिरुक्तयावदभावकत्वरूप-पर्य्यवसितपूर्व्वलक्षणार्थस्य सम्बन्धरूपतासम्भवात्। 'अवच्छेदकत्व-मिति अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्य्यविषयताव-च्छेदकमित्यर्थः, 'तत्पर्य्याप्त्यधिकरणत्वं' पर्य्याप्तिसम्बन्धेनावच्छेद-कतावत्त्वं, तथाच पर्य्याप्तिसम्बन्धेनावच्छेदकत्वावच्छिन्नस्य भेदो-ऽनवच्छेदकपदेन विवक्षित इति भावः। 'विशिष्टवह्न्यभावस्य' 'प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्येत्यन्वयः, महानसीय-त्वादिविशिष्टवह्न्यभावस्य प्रतियोगितायां महानसीयत्वसहित-वह्नित्वस्यावच्छेदकत्वेऽपि आश्रयतासम्बन्धेनावच्छेदकतावदन्य-त्वस्य वह्नित्वे दुर्लभत्वादिति भावः। प्रतियोगिविशेषणतापन्न-धर्म्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं प्रदर्श्य प्रति-योगिविशेषणतापन्नधर्म्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयते इति नियममनभ्युपगन्तुर्व्यधिकरणधर्म्मावच्छिन्नाभाववादिनः प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योग्यवृत्तिधर्म्मसहितप्रतियोगिवृत्तिधर्म्मपर्य्याप्तप्रतियोगितावच्छेद-कताकोप्यभावोस्तीति व्युत्पादनाय तादृशाभावमादायापि दूषणं दर्शयति, 'ऋदत्वेति, उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभय-घटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः । 'न चेति-रिति, अवच्छेद्याश्रयविशेषणभावापन्नेषु तदानापन्नेषु वा नाना-धर्म्मेषु पर्य्याप्तं यदवच्छेदकत्वं पर्य्याप्तिसम्बन्धेन तदवच्छिन्नभेदस्य तत्पर्य्याप्त्यनवच्छेदकप्रत्येकधर्म्ममात्रवृत्तिधर्म्मावच्छेदेन सत्त्वाद्वह्नि-त्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वाद्यवच्छिन्ने घट-पटोभयत्वावच्छिन्नभेदवन्निष्ठत्वुहत्वादिति भावः । न च वह्नि-निष्ठऋदत्वावच्छिन्नोभयावच्छिन्नप्रतियोगितायाः सामानाधिक-रण्येन यदवच्छेदकत्वं तद्वह्नित्वमात्रे पर्य्याप्तं ऋदत्वस्य व्यधि-करणतयैवावच्छेदकत्वादिति कथं वह्नित्वस्य तादृशावच्छेदका-वच्छिन्नान्यत्वनिर्व्वाह इति वाच्यम् । यतः सामानाधिकरण्येना-नवच्छेदकमित्यस्य तत्तत्प्रतियोगितासमानाधिकरणवृत्तियत्-प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटवत्त्वमित्यर्थः, इत्यञ्च ऋदत्व-वह्नित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्ये-कमेवावच्छेदकत्वमुभयत्रपर्य्याप्तं तदवच्छिन्नभेदो वह्नित्वेऽव्याहत-एवेति । ननु संयोगादिसाध्यकसद्धेतावव्याप्तिवारणाय तदभाव-व्यावर्त्तकव्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूप-व्यभिचारिहेतावतिव्याप्तिप्रसङ्गः अभावान्तरस्यैव लक्षणघटक-त्वादित्याशङ्कां व्यभिचारिहेतुकस्थले संयोगाद्यभावस्य लक्षणघट-कत्वप्रदर्शनेन परिहरति, 'सत्त्ववतीति, 'व्याप्यवृत्तिरित्युपलक्षणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगिव्यधिकरणस्येत्यपि बोध्यम्। अयम्भावः व्याप्यवृत्तित्व-मत्र नावच्छिन्नवृत्तिकान्यत्वं न वा स्वसमानाधिकरणाभावप्रति-योगित्वसामान्याभावः, प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्य-धिकरणावृत्तित्वं, किन्तु स्वाधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रति-योगित्वं निरवच्छिन्नवृत्तिकत्वं वा व्याप्यवृत्तित्वं, प्रतियोग्यनधि-करणवृत्तित्वञ्च प्रतियोगिवैयधिकरण्यं तच्च संयोगाद्यभावसाधा-रणं, हेत्वधिकरणे तथात्वस्य(१) विवक्षितत्वात् सद्धेतुस्थले न तादृ-शाभावस्य लक्षणघटकता तत्र गुणादेर्हेत्वनधिकरणत्वात्, सत्तादि-हेतुकस्थले तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगि-व्यधिकरणश्च साध्याभावो लक्षणघटक एवेति। 'वक्ष्यमाणमिति सिद्धान्तलक्षण इत्यादिः, 'तदवच्छेदकत्वं' प्रतियोगितावच्छेदकत्वम्, 'इहापि' एतल्लक्षणेऽपि, 'बोध्यं' विवक्षणीयम्, अन्यथा लघुरूपसम-नियतगुरुधर्म्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिरिति भावः। तथाच संयोगादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिविशेषणेन व्यावर्त्तनेऽपि न क्षतिः व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदका-नतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्त्वेन तदवच्छिन्नसाध्यकव्यभि-चारिण्यतिव्याप्त्यप्रसक्तेरिति यथाश्रुताशयोऽत्रावगम्यते स न सङ्ग-च्छते, सत्तावान् जातेरित्यादौ सत्तात्वस्य हेतुसमानाधिकरणाभाव-प्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितायाः सत्त्वा-त्तत्साधारणतयाऽव्याप्तेर्वारणाय स्वविशिष्टसम्बन्धिनिष्ठाभावप्रति-

(१) हेत्वधिकरणे अनवच्छिन्नवृत्तिकत्वस्य प्रतियोग्यनधिकरणहेत्वधिकरण-वृत्तित्वस्य च विवक्षितत्वादित्यर्थः।

•Markandeya Purana, Fasc. 5-7 @ /10/ each ... ... Rs.	1	14
*Mimāṁsā Darçana, Fasc. 10-19 @ /10/ each ...	6	4
Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
•Nirukta, Vol. IV. fasc. 1-8 @ /10/ each	5	0
*Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I. Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each ...	6	14
Nyayabinduṭikā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Nyayasarah	2	0
Padumawati, Fasc. 1--5 @ 2/	10	0
*Pariçiṣṭa Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/	1	14
Sāṅkhya Sūtra Vṛtti, Fasc. 1--4 @ /10/ each	2	8
Ditto (English) Fasc. 1--3 @ 1/- each	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
" Pratisakhya, Fasc. 1-3 @ /10/ each	1	4
•Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each	10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV. Fasc. 1, Vol. V, Fasc. 1--5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, fasc, 1, @ /10/ each	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
•Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol. II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3	3	12
Tibetan Series.		
Baudhyastotrasangraha, Vol. I (Tib. & Sans.)	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans. Avadāña Kalpala Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each	15	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1 6, @ 1/ each	14	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

•The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Āin-i-Akbari, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1--7, Vol. II, Fasc. 1--5, Vol III, ...	36	0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each	20	0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each	11	14
Conquest of Syria, Fasc. 1-9 @ /10/ each ... ... Rs.	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Farnang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...	4	0
Futūḥ-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each	5	10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each	2	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Ālamgīrī, Fasc. 1--6 @ /10/ each	3	12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each	3	2
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc 1 @ 1/ each	16	0
Muntakhabu-l-Lubāb, Fasc. 1- 19 @ /10/ each	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc 1--2 @ /12/ each	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott	5	0
Riyāzu-s-Salātin, Fasc 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Tadhkira-i-khushnavīsān	1	0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc 1--7 @ /10/ each ..	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each	3	0
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each 20
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts 1--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P.

20-9-11.